This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. ४९ वर्गांक वेद
नांव - अथर्ववेद प्रयोगभानु
लेखक/~~लिपीकार~~ रविशंकर द्विवेदी पृष्ठ १०२
काळ १ पूर्ण/~~अपूर्ण~~

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. ५० वर्गांक वेद
नांव - सामवेद महारुद्र पद्धती
लेखक/~~लिपीकार~~ शिवराम विश्राम शुक्ल पृष्ठ ३८
काळ इ.स. १-५-१९४४ पूर्ण/~~अपूर्ण~~

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. ५१ वर्गांक वेद
नांव - सामवेद महारुद्र पद्धती
लेखक/~~लिपीकार~~ शिवराम विश्राम शुक्ल पृष्ठ ३८
काळ इ.स. १-५-१९४४ पूर्ण/~~अपूर्ण~~

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. ५२ वर्गांक वेद
नांव - सामवेद महारुद्र पद्धती
लेखक/~~लिपीकार~~ शिवराम विश्राम शुक्ल पृष्ठ ३८
काळ इ.स. १-५-१९४४ पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ श्रीसामवेदमहारुद्रपद्धति प्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निवेदनम्

ग्रन्थोऽयं सामवेदविलासि विद्वद्वरेभ्यो जिज्ञासु विद्यार्थिभ्यश्च प्रकाशनेनीतः

प्रकाशनेच स्वर्गस्थ पं. श्री आदित्यरामात्मजः वे. शा. सं. कपडवंजपुर निवासिभिः केशवलाल सामवेदाचार्यैः स्वतात करकमल लिखितानमिमंग्रन्थं दत्वाऽऽत्यन्त सहायताकृता, तेषांच सहृदयेनाऽनुकम्पां शिरसावहामः ।

अस्यग्रन्थस्य संशोधने 'याज्ञिकमार्तण्ड' वे.शा सं. द्विवेदीत्युपनाम्ना श्री 'सुन्दरदेव' महोदयेनातीवश्रमो विधत्तस्तदर्थश्चतेषांमुपकारं सहृदयेनमंस्यामहे तथाच तेषांमामोदाय पुज्यपितृचरणानां प्रतिमाप्रकटीकृता ॥

लेखकश्चास्यः—

मुनशीत्युपनाम श्रीधनशङ्कर तनुजन्मा हरमणिशङ्करः

रायपुर आकाशेठकुवानी पोळ—अमदावाद

आँ. ती. २७—३—४४

प्रकाशकः-आत्रे, आयसाङ्गिरेतित्रिप्रवरान्वित, आत्रेयगोत्रोत्पन्नः सामवेदान्तर्गत कौथमीशाखाध्यायी श्रीधनशङ्करात्मज श्रीहरमणिशङ्कर शर्मा. वडनगरा नागर ब्राह्मण

जन्म सं. १९४७ ना आश्विन कृष्ण ८ ता. २५-१०-१८९१ रवीवार

ठे. रायपुर आकाशेठकुवा पोळ-अमदावाद

जन्म—संवत १९५० महा सुद १२ शनिवार.

अवसान—संवत १९९८ ना वैशाख सुद १ गुरुवार ता. १६-४-४२

संपादकः—शास्त्री केशवराम आदित्यराम सामवेदाचार्य.

ठे. सलाटवाडा, मु. कपडवंज.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्व. कौशिक गोत्रोत्पन्नो द्विवेदीत्युपाह्व

श्रीमगनलाल सूनु श्रीसांकलेश्वर शर्मा.

जन्मतिथिः संवत १९२१ फा. ८ शु. गुरूवार

अवसान तिथिः संवत १९८२ पोष शु. १३ रवीवार

॥ अथ श्रीसामवेदमहारुद्रपद्धति प्रारंभः ॥

॥ श्री गणेशाय नमः ॥ श्रीभवानीशंकराभ्यांनमः ॥ प्रणम्यतातंविश्रामं विघ्नेशंजगदंबिकां ॥ छंदोगानां हितार्थाय वक्ष्येरुद्रस्यपद्धतिं ॥ १ ॥ तत्रकालमाहपराशरः ॥ वैशाखेश्रावणेमासिचाश्विनेमार्गशीर्षके ॥ माघफाल्गुनयोर्वापि सितेपक्षेशुभेदिने ॥ रुद्रारंभःपकर्तव्यःपूत्रपौत्रादिवर्द्धये ॥ कार्त्तिकेस्वर्णलाभःस्यादित्यन्यत्र । वर्ज्यानिसंग्रहवाक्ये । अनध्यायतिथींरिक्तां तथाविष्टिंविहायच । इतरासुचकर्तव्योरुद्रारंभःशुभप्रदः ॥ अनध्यायेचसंध्यायामपराह्णे कथंचन ॥ स्त्रियांरजस्वलायांचकर्मारंभोनसिद्धिदः ॥ सोमसौम्यगुरुशुक्रवासराःसर्वकर्मसु । भवंतिसिद्धिदाइति सामान्येनसर्वकर्मसुवाराअप्युक्ताः ॥ दीपिकायांतु ॥ ईश्वराराधनार्थेवाथवापापापनुत्तये । यदिरुद्राद्यनुष्ठानंनमुहूर्त्तादि चिंतयेत् । यदैवजायतेवित्तंचित्तंश्रद्धासमन्वितं ॥ तदैवपूण्यकालस्याद्यतोनीत्यंहिजीवितं ॥ श्वःकार्यमद्यकुर्वीतपूर्वाह्णे चापराह्णिकं ॥ नहिप्रतीक्ष्यतेमृत्युःकृतंवास्यनवाकृतं ॥ नश्वःश्वमुपासीतकोहिमनुष्यस्यश्वोवेदितिश्रुतेश्चपरशुरामोप्याह । ततःसर्वेषुकालेषुजपस्यारंभणंस्मृतमिति ॥ अत्राधिकारिणमाहपराशरः ॥ त्रैवर्णिकाधिकारःस्यान्नैवसर्वाधिकारकः ॥ नाधिकारोहिशूद्राणांयतःकर्माणिवैदिके ॥ नैवास्तिवेदवाक्यस्य श्रवणेप्यधिकारिता ॥ तस्यस्यादधिकारित्वंकथंकर्मणिवैदिके। अतोरुद्राद्यनुष्ठानेसर्वस्मिन्नपिवैदिके। त्रैवर्णिकोधिकारिस्यान्नशूद्रादिरितिस्थितं॥ ऋत्विक्स्वरूपमाहपरशुरामः ॥ श्रोत्रियायेसदाचाराःसाधवःसत्यवादिनः ॥ वेदवेदांगपारज्ञानिपुणायज्ञकर्मणि । अनूचानाःकुलीनाश्चशैवशास्त्रविशारदाः ॥ एवंलक्षणसंयुक्ताऋत्विजःशुभकर्मसु ॥ ॥ रुद्रःपंचविधः ॥ ॥ रूपंरुद्रीरुद्रोमहारुद्रोतिरुद्रश्चेति रुद्राध्यायः सरुद्रःस्यात्प्रथमःसांगशीर्षकः ॥ एकस्यैकादशावृत्यारुद्रीनाम्नाद्वितीयकः ॥१॥ सांगमाद्यंजपेद्रूपंकेवलानि नवांतरे । सांगंसशीर्षकंचात्यंनिरंगमितिकेचन ॥ २ ॥ ताभिरेकादशोक्ताभिर्लघुरुद्रस्तृतीयकः । लघ्वेकादशभिस्तद्वन्महारुद्रश्चतुर्थकः ॥ ३ ॥ एकादशमहारुद्रैरतिरुद्रःसपंचमः ॥ एषुपंचसुरुद्रेषुश्रेष्ठःस्यादुत्तरोत्तरः । सामवेदेरुद्रस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पडंगानि। भ्राजाभ्राजेतिहृदयमबोध्यग्निःशिरस्मृतम् । अदर्दरुरितिशिखाआमंद्रैःकवचंन्यसेत्। इदंविष्णुरितिनेत्रमावो राजानमस्त्रक ॥ ॥ अथकर्मक्रमः ॥ ॥ तत्रादौकर्माधिकारसिध्यर्थंप्रायश्चित्तंशक्त्याकार्यं । कस्यचित्पापस्यसंभावना यांस्मृत्युत्तरतत्प्रायश्चित्तैःकर्मारंभात्प्राक्तत्परिहारःकार्यः। तत्रचतुरस्त्रीनेकंवाध्यात्मविदं पर्षदत्वेनोपवेश्याभुंजानःक्लिन्न वासापर्षदंप्रदक्षिणीकृत्यसाष्टांगंप्रणम्य वृषस्यपणनवतिपणान् गोर्द्वात्रिंशत्ताम्रपणानपर्षदग्रेनिधाय॥ प्रायश्चित्तग्रहणांगं इदंगोमिथुननिष्क्रयद्रव्यं सभ्येभ्योहंसप्रददेनमम । ततःअमुकस्यममहारुद्रकर्माधिकारसिद्धये प्रायश्चित्तमुपदिशंतु भवंतः। प्रसादःक्रियतांमह्यंशुभानुज्ञांप्रयच्छथ । पूज्यैकृतपवित्रोहंभवेयंद्विजसत्तमैः एवंसंप्रार्थ्यमामनुगृह्णंतुभवंतइत्युक्त्वा प्रणमेत् । ततस्तेतमुत्थाप्यतस्यद्रव्यादिशक्त्या उत्तममध्यमादिपक्षांश्चविचार्यकथयेयुः ॥ प्रत्याम्नायाश्चयथाशक्त्याकथ येयुः ॥ ततोनिवेदितंप्रायश्चित्तमवदनुग्रह इत्यंगीकृत्यसन्मानपूर्वकंपर्षदंप्रणम्यविसर्जयेत् ॥ ॥ अस्मिन्नहनिशक्तेनोप वासःकार्यः ॥ इतरेणहविष्याशनं । ततःप्रायश्चित्तसंकल्पंकुर्यात् । कुशपाणिःकृत्वाचमनोदेशकालौसंकीर्त्यअमुक शर्मणोममसभार्यस्य देहशुद्ध्यर्थंमहारुद्रकर्मणि अधिकारजननार्थंद्वादशब्राह्मणभोजनरूप प्राजापत्यप्रत्याम्नायेनपंचदश त्रिंशत्संख्याकानि प्राजापत्यान्यहमाचरिष्यामि । अथवा द्वात्रिंशत्पणपरिमितगोदाननिष्क्रय द्रव्यदानप्रत्याम्नायेन एतावंतिप्राजापत्यान्यहमाचरिष्यामि ॥ ततःप्राच्यंगानि । तत्रादौवपनं । तच्चमंगलकर्मांगभूतप्रायश्चित्तेवपनाभावः। अभ्युदयार्थंपुनैववपनमितिविज्ञानेश्वरोक्तेः । ततोदंतधावनं ॥ आयुर्बलंयशोवर्चइत्यादिमंत्रेण । ततोदशस्नानानि । आदौभस्मनास्नानं । ॐतत्पुरुषायविद्महेमहादेवायधीमहितन्नोरुद्रःप्रचोदयात् ॥ इतिमंत्रंपठित्वा मस्तकादारभ्यांघ्रि पर्यंतंलापयित्वाप्रणवेनसर्वांगेलापयेत् । ततोगोमयेन । गावश्चिद्घासमन्यवइतिमंत्रेण प्रतिलोमेनांगान्यालिंपेत् । अथ मृत्तिकाया । सहस्रशीर्षेतिमृत्तिकामादाय गायत्र्याअभ्युक्ष्यअमोसीतिप्रतिलोमान्यंगान्यालिंपेत् । ततःजलस्नानं । तत्रगंगादितीर्थानिसंस्मृत्यआपोहिष्ठेतितृचेनमार्जनंकृत्वा ऋतंचेत्यघमर्षणंकृत्वास्नायात् । ततःआपोहिष्ठेतितृचेनशुद्धो- दकस्नानं ॥ ततःपंचगव्यैःगायत्र्यागोमूत्रेणागावश्चिदित्तिगोमयेन। चक्रंयदस्येतिगोक्षीरेणऽदधिक्राव्णइतिदध्नाघृतवती

इतिघृतेन । देवस्यत्वेतिकुशोदकेन देवस्यत्वेतिमंत्रेअभिषिंचामित्यंतेप्रयोज्यं । भस्मगोमयमृद्वारिपंचगव्याकुशोदकै रितिदशविधस्नानक्रमबोधकंवाक्यं ॥ ततःशुद्धेवाससीपरिधायासंकल्पं श्राद्धविधिनावैष्णवश्राद्धं ॥ अथवातदुद्देशेन ब्राह्मणभोजनसंकल्पः ॥ ततःप्रायश्चित्तांगहोमद्रव्यसंकल्पः ॥ देशकालौसंकीर्त्यप्रायश्चित्तांगभूतहोमसिध्यर्थं तिलशर्क राज्यानि तत्रदेवताःप्रीतये कस्मैचिद्ब्राह्मणायाहंदास्ये । ततोमुखावलोकनं । सहिरण्यमाज्यपात्रमानियविलोकयेन्मंत्रेणा आज्यंतेजःसमुद्दिष्टं आज्यंपापहरपरं आज्यंसुराणामाहारं आज्येलोकाप्रतिष्ठिताः दिविभुव्यंतरिक्ष्यस्थंयन्मेकिंल्विष मागतं । तत्सर्वमाज्यसंस्पर्शात्प्रनाशमुपगच्छतु ॥ ततस्तद्ब्राह्मणायदद्यात् । सौर्यकांस्यपात्रंआग्नेयाज्यसहितं अमुक गोत्रायेत्याद्युक्त्वा तुभ्यंमहंसंप्रददेनमम ॥ ततोअद्यपूर्वोच्चरितएवं ग्रहगुणविशेषणविशिष्टायांतिथौयथाशक्ति कृतप्राय श्चित्तविधेःसर्वंपरिपूर्णमस्तु ॥ इतिप्रायश्चित्तं ॥ एतच्चकर्मारंभात्पूर्वंदिवसेकर्त्तव्यं ॥ ॥ अथकर्मारंभदिवसकृत्यं ॥ तत्रादौप्राङ्मुखो दङ्मुखोवाउपविश्य श्मश्रुकर्मकारयेत् । ततस्तिलामलकादिनांमलापकर्षणस्नानं । ततःआचमनं अहतवस्त्रद्वयधारणं । आचमनं । शिखाबंधनंमंत्रेण तिलकादि । यज्ञोपवीतद्वयंमंत्रेणधारयेत् । कर्मांगाचमनं । ततः प्राणायामः । ततःकर्मणःप्रधानसंकल्पः ॥ गुरुगणपतिशिवान्नत्वा सुमुखश्चेत्यादिपठित्वा ताम्रपात्रेकुशाक्षतकुसुमजलानि कृत्वा देशकालौसंकीर्त्य श्रीरुद्रप्रीतिकामोहंसामवेदांतर्गत कौथुमीशाखीयजपरुद्रैकादशिन्या एकादशएकादशगुणवृत्ति संपादितएकविंशोत्तरशत रुद्रीजपात्मकंमहारुद्राख्यंकर्माहंकरिष्ये ॥ इतिसंकल्प । यथाविधिनामातृपूजापूर्वकमाभ्यु दयिकंकार्यं ॥ तत्रैवप्रयोगः । देशकालौसंकीर्त्य महारुद्रकर्मांगत्वेनविहितंगौर्यादिचतुर्दशमातृणां वसोर्द्धारासहितानां स्थापनप्रतिष्ठापूजनमहंकरिष्ये ॥ इतिसंकल्प्य मातृपूजांविधाय आयुःशांतिंपठेत् ॥ तत्रऋष्यादयः । अबोध्यग्निरित्यस्य प्रजापतिस्त्रिष्टुबग्निः । महित्रीणामितिद्वयोः पृष्टवाङ्गायत्रीप्रजापतिः । त्वावतइतिसामश्चोगायत्रींद्रः । इंद्रंनरइतिगौरी वितिस्त्रिष्टुबिंद्रः ॥ त्यमूष्वितिद्वयोस्तार्क्ष्यस्त्रिष्टुबिंद्रः । त्रातारमित्यस्यइंद्रस्त्रिष्टुबिंद्रः । सोमःपुनाइत्यस्यप्रजापति रुष्णिकसोमः ॥ सामृइत्यस्यप्रजापतिरुष्णिकसोमः । विश्वतोदावन्निनिप्रजापतिपंक्तिःरिंद्रः । उदुत्तममितिवरुणगोतमौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रिष्टुप्वरुणादित्यौ । शांत्यर्थेजपेविनियोगः ॥ तत्रआयुःशांतिपठित्वा वैश्वदेवंकृत्वा । वृद्धिश्राद्धंकुर्यात् । तत्रसंकल्पे
गोत्राणामित्याद्युक्त्वा महारुद्रकर्मणोंगतयाविहितं श्राद्धंपार्वणद्वयंविश्वेदेवापूर्वकमर्घपिंडसहितं युष्मदनुज्ञया।अहंकरिष्ये
इतिसंकल्प्य यथाविधिनावृद्धिश्राद्धंकुर्यात् ॥ ॥ ततःसग्रहविनायकशांतिः । अशक्तौगणपतिपूजासर्वोपचारैर्वक्ष्यमाण
विधिना । ततःऋत्विग्वरणं ॥ ॥ तत्रादौसमाचारात्भूतोत्सादनं ॥ तत्रसन्नामृष्यादयः ॥ अग्नेरक्षाइत्यस्याग्निर्गायत्र्यग्नी
रक्षोहा । अग्नेयुंक्ष्वेत्यग्निर्गायत्र्यग्निःसनादग्नेत्यग्नित्रिस्त्रिष्टुबाग्नीरक्षोहा । प्रत्यग्नेत्यगस्त्योनुष्टुबग्नीरक्षोहा । नतस्येत्य
गस्त्योष्णिगग्निः । शुध्यग्नेत्यगस्त्योष्णिगग्नीरक्षोहा यद्वाउइत्यगस्त्योष्णिगग्नीरक्षोहा । अहावोहेत्यग्नायिरितिद्वयोरग्नि
र्वैश्वानरोष्टिरग्निः । आनोबुवाइतिपरमेष्ठीप्रजापतिरनुष्टूप्प्रजापतिः । आशुःशिशानत्यध्यायस्याप्रतिरथऋषिः ॥ अव
मृष्टेत्यादिचतुर्णांभरद्वाजः । आद्यत्रयोदशर्चांत्रिष्टुप्प्रेताजयताअवसृष्टेति द्वयोरनुष्टुप् । कंकाइत्यस्यास्त्रिष्टुप् ।
अमित्रसेनेत्यनुष्टुप् । यत्रबाणइत्यस्याःपंक्तिः । विरक्षोविनइंद्रद्वयोरनुष्टुप् इंद्रस्यबाह्वइत्यस्याःस्वाराट्त्रिष्टुप् । मर्मा
णितेत्यस्यास्त्रिष्टुप् । अंधाअमित्रेत्यस्यनुष्टुप् । योनस्वेत्यस्याःपंक्तिः । मृगोनभीमभद्रंकर्णेतिद्वयोस्त्रिष्टुप् । स्वस्ति
इत्यस्याःस्वराट्त्रिष्टुप् । समस्ताध्यायस्यानादेशइंद्रोदेवताबृहस्पतेत्यस्याबृहस्पतिः । इंद्रआसांनेत्यस्याइंद्रबृह-
स्पतीः । देवसेनेत्यन्यामरुतः । इंद्रस्यवृक्ष्योइत्यस्याक्रमेणवरुणआदित्यामरुतोदेवाश्च । असौयासेनेत्यस्यामरुतः ।
अमीषामित्यस्याआपः । प्रेतेत्यस्यायोद्धारोदेवादेवताः । अवसृष्टेत्यस्याइषुर्देवता । अमित्रसेनेत्यस्याअग्निः । यत्र
बाणाइत्यस्याइंद्रश्चबृहस्पतिश्चादितिश्चदेवताः । मर्माणितइत्यस्यासोमवरुणदेवाश्चदेवताः भद्रंस्वस्तिनंइत्येतयोर्विश्वे
देवाः । भूतोत्सादनेविनियोगः । अग्नेरक्षादिपठित्वा । यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा । स्थानंत्यक्त्वातुतत्सर्वं
यत्रस्थंतत्रगच्छतु । अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं । सर्वेषामविरोधेनब्रह्मकर्मसमारभे । भूतप्रेतपिशाचाद्याअप
क्रामंतुराक्षसाः । स्थानादस्माद्व्रजंत्वन्यत्स्वीकरोमिभुवंत्विमां । अपसर्पंतुतेभूतायेभूताभुविसंस्थिताः । येभूताविघ्नकर्त्ता
रस्तेनश्यंतुशिवाज्ञया । एभिर्मंत्रै । रभिमंत्रितानक्षतान्सर्वत्रप्रक्षिप्यभूतान्युत्सादयेत् । ततोगुरुभ्योनमः । गणपतयेनमः।

अवज्यामिवधन्वेतिपठित्वा भैरवायनमः । श्रीशिवायनमः। इतिनमस्कृत्यभूशुद्धिंकुर्यात् ॥ ॥ भूमिर्भूमिरितिसान्नः
रुद्रऋषिः । यजुःभूम्यादयोदेवताः । भूम्यभिमंत्रणेविनियोगः । हस्तेनभूमिंसंस्पृश्यसामपठित्वा पृथिवींचंदनादिभिः
पूजयेत् । स्योनापृथिवीइतिमेधातिथिःपरष्णिक्पृथिवीपूजनेविनियोगः । स्योनापृथिवीतिमंत्रेणगंधादिभिःसंपूज्य
पुष्पांजलिंदत्वानमस्कुर्यात् उद्धृतासिवराहेणकृष्णेनशतबाहुना । दंष्ट्राग्रेलीलयादेवियज्ञार्थंप्रणमाम्यहं । अनेनपुष्पां
जलिंदत्वा नमस्कृत्यप्रार्थयेत् । मातर्भूमिरगन्मातासर्वाधाराहरिप्रिया । भूयामपुत्रैःपशुभिर्योनोद्वेष्टिसभिद्यतां ॥
निर्विघ्नंममकर्मेदंयथास्यात्त्वंतथाकुरु । एवंसंप्रार्थ्यपृथिव्यैपुष्पांजलिंदत्वाप्रणमेत् ॥ ततस्ताम्रपात्रंसयवजलपुष्पकुश
मादायसोमसामादिपठित्वा । अद्यश्रीहकस्यचित्सच्चिदानंदरूपस्यब्रह्मणो निर्वाच्यमायाशक्तिविजृंभिताविद्यायोगात्
कालकर्मस्वभावाविर्भूत महत्तत्वोदिताहंकार तृतीयोद्भूतवियदादि पंचकेंद्रियदेवतानिर्मितांडकटाहे चतुर्दशलोकात्म
लीलयात्तन्मध्यवर्त्तिभगवतः श्रीनारायणस्यनाभिकमलोद्भूतसकललोकपितामहस्यब्रह्मणःसृष्टिंकुर्वतस्तदुद्धरणायचपजा
पतिप्रार्थितस्यमहापुरुषस्य सितवाराहावतारेण ध्रियमाणायामस्यांधरित्र्यांभूर्लोक संज्ञितायांसप्तद्वीप मंडितायांक्षीरो
दाद्यब्धिद्विगुणद्वीपवलयीकृतलक्षयोजनविस्तीर्णे जंबूद्वीपेस्वर्गस्थितामराद्याशासितावतारे गंगादिसरिद्भिःपावितेवर्षे
निखिलजनपावन शौनकादिमुनिकृतनिवसतिके नैमिषारण्येकुमारिकानामक्षेत्रे श्रीभगवतोमार्त्तंडस्यकृपापात्रकालत्रित
यज्ञगर्गवराहाचार्यादिगणितायांसंख्यायांश्रीब्रह्मणोद्वितीयपरार्द्धे श्रीश्वेतवाराहनाम्नि प्रथमकल्पेद्वितीयेयामेतृतीयेमूहूर्ते
स्वायंभुवस्वारोचिषोत्तमतामसरैवतचाक्षुषेति षण्मनूनामतिक्रांतानामतिक्रम्यमाणे संप्रतिवैवस्वतमन्वंतरेयुगानांत्रिघ्ने
यातेअष्टाविंशतितमेचतुर्लक्ष द्वात्रिंशत्सहस्राधिकमिते कलियुगेतत्प्रथमचरणे व्यतिक्रांतायाश्चतुःसाहस्र्याःसप्तशत्यधि
कायास्तदुपरिव्यतिक्रममाणे अमुकतमेष्टदेअमुकनामसंवत्सरे अमुकायनगते श्रीसूर्येअमुकऋतौमासपक्षतिथिवाराद्युच्चार्य
एवंगुणविशिष्टेपुण्येकालेदेशेच ममक्षेमायुरारोग्यपरमश्रीसुखावाप्तये । पुत्रादिसर्वसंपत्तिचिंतितार्थस्यसिद्धये । आधि
व्याधिजरामृत्युभयशोकनिवृत्तये । भूतभव्यभविष्येतित्रिविधोत्पातशांतये सर्वेनसामपद्धस्त्यैनिरस्त्यैचाषदद्विषां परमै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वर्यसंपत्यैनिष्पत्यैजपकर्मणः । महारुद्रजपंयज्ञंकरिष्येगतयातथा । आचार्यादिसमस्तानांद्विजन्मनां पादार्घंप्रकरिष्येहं ।
इत्युक्त्वाजलंभुव्युत्सृजेत्कुरुष्वेति ब्राह्मणानांप्रत्युक्तिः । ततःसमाचारान्मृत्पात्र संपुटेदध्यक्षत जलपुष्पाणिकृत्वातत्
संपुटंसूत्रेणबध्वातत्संपुटहस्ताभ्यां उत्थायद्विजान्प्रार्थयेत् । सोमसामादिपठित्वा ॥ पावनाःसर्ववर्णानांब्राह्मणाब्रह्म
रूपिणः । अनुगृह्णंतुमामद्यमहारुद्राख्यकर्मणि । स्वस्वकर्मरतानित्यंवेदशास्त्रार्थकोविदाः । श्रोत्रियाःसत्यवाचश्चदेव
ध्यानरताःसदा ॥ यद्वाक्यामृतसंसिक्ताबुद्धियांतिनरद्रुमाः अंगीकुर्वंतुकर्मैतत्कल्पद्रुमसमाशिषः । यथोक्तनियमैर्युक्ता
मंत्रार्थस्थिरबुद्धयः। यत्कृपालोकनात्सर्वाऋद्धयोवृद्धिमाप्नुयुः॥ स्वागतंवोद्विजश्रेष्ठाःमदनुग्रहकारकाः। इदमर्घ्यमिदंपाद्यं
भवद्भिःप्रतिगृह्यतां। चरणक्षालनाद्देवास्तुष्यंतिशुद्धमानसाः। तज्जलेनचसंसिक्ताःपूर्णकामाभवंतुनः । इमंवोर्घंप्रयच्छामि
गृह्णंतुप्रीतिमानसाः । पावयंतुचमानित्यंपूरयंतुमनोरथान । प्रीतयेपरमेशस्यभूरिभावाप्तयेपुनः । महारुद्रजपारंभहवनां
तस्यकर्मणः । सिध्यर्थंमाचरिष्येहंवरणंमानुपंपुरा । दैवंपश्चाच्चतंत्रेणश्रीमहारुद्रकर्मणि । इत्युक्त्वाब्राह्मणानामग्रतोर्घं
स्थापयेत् । ब्रह्मास्वशाखीयस्त्रैविद्योवा । वरणेब्रह्माआचार्यजापकाइत्येवंक्रमेणवरणमितिबहवः । माध्यंदिनशाखीय
गृह्यमंत्रभाष्येतु । आचार्यंवृणुयात्पूर्वंब्रह्माणंत्तदनंतरं । ततःकर्माणिकुर्वीतसर्वसूत्रविदांमतमिति ॥ इदंतच्छाखिनामिति
केचित्॥ छंदोगानामपिदैवर्त्विग्वरणक्रमबोधकब्राह्मणवाक्ये अग्निर्मेहोतादित्योमेध्वर्युश्चन्द्रमामेब्रह्मेतिब्रह्मवरणस्योत्तर
कालतादृश्यतेतस्मादयमेवक्रमोयुक्तः ॥ आचार्यादिसमस्तानांजापकानामितिवाक्येनाचार्यपूर्वकतापरशुरामोप्याह ।
ततःप्राङ्मुखमाचार्यमुपविश्यस्वयंमुदङ्मुखोवृणुयात् । अक्षतानादाय । आचार्यस्यदक्षिणंजान्वालभ्य अमुकगोत्रंअमुक
प्रवरंसामवेदस्यकौथमि शाखाध्यायिनं अमुकशर्माणंमहारुद्रकर्मणाअहंयक्ष्ये तत्रत्वामहमेभिरर्घ्यादिभिराचार्यंवृणे ॥
वृतोस्मीतिसब्रूयात् । एवंमानुषंवरणंकृत्वादैवंवरणंकुर्यात् ॥ आवाहयामिदेवेशमाचार्ययज्ञकारिणं । पुराणन्याय
मीमांसाधर्मशास्त्रार्थपारगं । आचार्यस्तुयथास्वर्गेशक्रादिनांबृहस्पतिः । तथात्वंममयज्ञेस्मिन्नाचार्योभवसुव्रत । ततः
आचार्यएतत्तेपाद्यं । पादावनेजनं । इत्येवोऽर्घ्यं । इदमत्रचंदनंचपुष्पंच । एवंसर्वत्र । ततःस्वयंप्राङ्मुखो उदङ्मुखान्

सर्वान्वृणुयात् । उदङ्मुखंब्रह्माणमुपवेश्य गोत्राद्याभाष्यत्वामहंब्रह्माणंवृणे । प्रतिवचनानंतरं ॥ आवाहयामिदेवेशं
ब्रह्माणंकमलोद्भवं । चतुर्वेदसमायुक्तं सर्वसिद्धांतवेदिनं । यथाचतुर्मुखोब्रह्मासर्ववेदविशारदाः । तथात्वंममयज्ञेस्मिन्
ब्रह्माभवद्विजोत्तम । ब्रह्मन्नेतत्तेपाद्यमित्यादि । ततोरुद्रीजापकान्वृणुयात् । गोत्राद्युक्त्वामहारुद्रकर्मणाहं यक्ष्येतत्रत्वा
महंरुद्रीजापकावृणे । प्रतिवचनानंतरं॥ सामवेदमधीयानंतथाकौथुमीशाखिनं । जपार्थंजपयज्ञेस्मिन्जापकं त्वामहं
वृणे ॥ जापकाएतत्तेपाद्यमित्यादि । एवमेकादशरुद्रीजापकंत्वामहंवृणे ॥ जापकएतत्तेपाद्यमित्यादि । एवमेकादश
रुद्रीजापकंत्वामहंन्वृणे ॥ जापकएतत्तेपाद्यमित्यादि। एवमेकादशरुद्रीजापकात्वामहंवृणे । जापकएतत्तेपाद्यमित्यादि।
एवमेकादशरुद्रीजापकान्वृत्वा पारायणपाठकान्वृणुयात् । गोत्राद्युक्त्वामहारुद्रकर्मणाहं यक्ष्येतत्रपूर्वद्वारेऋग्वेदपारा
यणपाठार्थंवृणे प्रतिवचनानंतरं । ऋग्वेदःपद्मपत्राक्षोगायत्रःसोमदैवतः । अत्रिगोत्रस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव ।
पारायणपाठकएतत्तेपाद्यमित्यादि । एवमन्यंऋग्वेदिनंगोत्राद्युक्त्वापूर्वद्वारेद्वारपालंवृणे । द्वारपालएतत्तेपाद्यमित्यादि
एवयजुर्वेदिनमुपवेश्यगोत्राद्याभाष्यदक्षिणद्वारे यजुर्वेदपारायणपाठार्थंत्वामहंवृणेप्रतिवचनानंतरं । कातराक्षोयजुर्वेद
स्त्रैष्टुभोरुद्रदैवतः। काश्यपेयस्तुविप्रेंद्र ऋत्विक्त्वंमेमखेभव । अन्यमुपवेश्यदक्षिणद्वारेद्वारपालंत्वामहंवृणे ततःसामग
मुपवेश्यगोत्राद्याभाष्यपश्चिमद्वारे सामवेदपारायणपाठार्थंत्वामहंवृणे । प्रतिवचनानंतरं । सामवेदस्तुपिंगाक्षोजाग्रतः
शक्रदैवतः ॥ भारद्वाजस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव । ततःपाद्यादि । अन्यमुपवेश्यपश्चिमद्वारेद्वारपालंत्वामहंवृणे ।
ततोथर्ववेदिनमुपवेश्यगोत्राद्याभाष्यउत्तरद्वारे अथर्ववेदपारायणपाठार्थंत्वामहंवृणे । प्रतिवचनानंतरं ॥ बृहज्जेत्रोथर्ववे
दोनुष्टुभोरुद्रदैवतः । वैशंपायनविप्रेंद्रऋत्विक्त्वंमेमखेभव । ततःपाद्यादि । अन्यमुपवेश्यउत्तरद्वारेद्वारपालंवृणे ।
ततःपाद्यादि । ततोगणपतिमंत्रजापकंवृणे । इतिगणपतिमंत्रजापकं । वांछितार्थफलावाप्त्यैपूजितोसिसुरासुरैःनिर्विघ्न
कृत्यसंसिध्यैत्वामहंगणपंवृणे ॥ नवग्रहमंत्रजापकंवृणे इतिग्रहमंत्रजापकं । त्र्यंबकंमंत्रजापकंवृणे ॥ यथामेऋत्विजः
सर्वेकर्मकुर्वंतिसंयताः सर्वेषांकर्मणांवक्तासदस्योभवसुव्रत ॥ इतिमृत्युंजयजापकं ॥ जातवेदसमंत्रजापकं । रुद्रगायत्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जापकं । सप्तशतीपाठार्थं । ततःसाहस्रं । गोत्राद्याभाष्यमहारुद्रकर्मणाहंयक्ष्येतत्रसर्वकर्मणामुपद्रष्टात्वंभवइति । एवं ब्राह्मणान्वृ वाद्विजचरणक्षालनजलंस्वशिरिसिधृत्वा स्वचरणोसमाचारात् प्रक्षाल्याचम्यवरणक्रमेण अर्हणीयशाखानुसारेणासर्वान्मधुपर्केणार्चयेत् ॥ तत्रसंकल्पेविशेषः । देशकालौसंकीर्त्यअस्मिन्महारुद्रकर्मणिवरणांगंआचार्यप्रभृतीनां ऋत्विजांमधुपर्केणार्चनमहंकरिष्येइतिसंकल्प्य अर्च्यशाखोक्तमधुपर्कविधिनासमर्च्यसंकल्पंकुर्यात् । सुसंप्रोक्षितमित्यादि कृत्वा यथादत्तंगांधर्वंगंधंवानस्पत्यानिपुष्पाणि सौर्याणिकांस्यपात्राणि रौद्राणिताम्रपात्राणि बार्हस्पत्यानिवासांसिप्राजापत्यान्युपवितानि आग्नेय्यःकुंडलमुद्रिकाःवरणांगंमधुपर्कसिध्यर्थं वरणांगार्चनसमृध्यर्थंवाआचार्यप्रमुखेभ्यःऋत्विग्भ्योहं संप्रददेनमम । अद्यारभ्यआसमाप्तेःप्रतिदिनमृत्विग्भ्यो यथासंपन्नेनान्नेनभोजनमहंदास्ये । ऋत्विजांवरणांगार्चनविधेः सर्वंपरिपूर्णमस्तु ॥ अस्यजपांगभूतस्यरूत्विग्वरणकर्मणःविधेन्यूनातिरिक्तंयत्ससर्वंसंपूर्णमस्तु ॥ ॥ इतिऋत्विग्वरणं ॥ ॥ अथस्वस्तिवाचनं ॥ ॥देशकालौसंकीर्त्य श्रीमहारुद्रप्रीतये महारुद्रकर्मणिअंगतयाविहितंपुण्याहवाचनमहंकरिष्येइति संकल्प्य दक्षिणोत्तरमुदक्संस्थौतंदुलपुंजौपरि यथाविधिनाकलशद्वयंसंस्थाप्य उत्तरकलशेवरुणंमंत्रेणावाहयेत् । यदा कदेतिपञ्चोबृहतीवरुणः । वरुणावाहनेविनियोगः । सामपठित्वा अस्मिन्कलशेवरुणमावाहयामि इत्यावाह्यप्रतिष्ठामंत्रं पठित्वा अस्मिन्कलशेवरुणःसुप्रतिष्ठितोवरदोभवतु । ततोवरुणंस्वमंत्रेणसंपूज्य कलशेदेवताआवाहयेत् । अक्षतान्हस्ते आदायकृतांजलिःपठेत् । कलशस्यमुखेविष्णुःकंठेरुद्रसमाश्रितः । मूलेतस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः कुक्षौतु सागराःसप्त सप्तद्वीपावसुंधरा । ऋग्वेदोथयजुर्वेदसामवेदोह्यथर्वणः । अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः शांतिः पुष्टिश्चगायत्रीसावित्रीचसरस्वती । सर्वेसमुद्राःसरितःसरांसिचनदानिच । आयांतुममशांत्यर्थंदुरितक्षयकारकाः । ततस्तत् कलशेअक्षतान्क्षिपेत् । ततोदक्षिणभागेपञ्चप्रतिवचनसमर्थान् ब्राह्मणानुपवेश्यगंधपुष्पादिभिरभ्यर्च्यगणपतिगुर्वादीन्न त्वादक्षिणकलशंहस्ताभ्यामादाय आशिषःप्रार्थयेत् ॥ ॥ अवनिकृतजानुमंडलं कमलमुकुलसदृशमंजलिंशिरस्याधाय दक्षिणेनपाणिनासुवर्णपूर्णकलशंधारयित्वा दीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिच तेनायुःप्रमाणेनपुण्याहंदीर्घमायु

रस्तु । अस्तुचइतिद्विजाःशिवाआपःसंतु । सौमनस्यमस्तु । अक्षतंचारिष्टंचास्तु । गंधाःपांतु । मांगल्यंचास्तु । अक्षताः पांतु । आयुष्यमस्तु । पुष्पाणिपांतु । सौश्रियमस्तु । तांबूलानिपांतु । ऐश्वर्यमस्तु । दक्षिणापांतु । बहुदेवारतु । दीर्घमायुःशांतिःपुष्टिस्तुष्टिश्रीर्यशो विद्याविनयोवित्तंबहुपुत्रंबहुधनंचायुष्यंचास्तु । अत्रसर्वत्रब्राह्मणैरस्तुपांतुसंतुइत्यादि यथायोग्यंप्रत्युत्तरंदेयं ॥ यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाःशुभाःशोभनाःप्रवर्त्तंते तमहमोंकारमादिकृत्वाऋग्यजुः सामाथर्वीर्वचनं बहुऋषिसंमतंसंविज्ञातंभवद्भिरनुज्ञातः पुण्यंपुण्याहंवाचयिष्ये । वाच्यतामितिप्रत्युक्तिः । एवमुत्तरत्रापि प्रत्युत्तरयथायोग्यं । द्रविणोदाद्रविणसस्तुरस्यद्रविणोदाः सनरस्यप्रयंसत् । द्रविणोदावीरवतिमिशन्नोद्रविणोदारासते दीर्घमायुः ॥ देवो३वो३द्रविणोदाः । सवितापश्चातात्सवितापुरस्तात्सवितोत्तरात्तात्सवितादरात्तात् । सवितानःसुवतु सर्वतातिंसवितानोरासतांदीर्घमायुः ॥ ऊर्द्धऊषुणा३ऊता२३४यायि० ॥ नवोनवोभवतिजायमानो० ॥ चंद्रमाआऊ। वा ०॥ उच्चादिविदक्षिणावंतो० ॥ उच्चाता३यिजातमंधसाः०॥ इत्येताःऋचःपुण्याहेब्रूयात् ॥ व्रतनियमतपःस्वाध्या०॥ इतिब्राह्मणः । प्रसीदंतुभवंतः ॥ सुप्रसन्नास्मइतिद्विजाः । शांतिरस्तु । पुष्टिरस्तु० ॥ सर्वाकुलदेवदेवताःप्रीयंतां । हताःचब्रह्मद्विषः० । हताइतिप्रत्युक्तिः० । शत्रवःपराभवंयांतु । शाम्यंतुघोराणी । शाम्यंतुपापानि । शाम्यंत्वीतयः । अत्रतेइत्यध्याहृत्यचतुर्ष्वपिवाक्येषुप्रत्युक्तिः । हतास्यअस्यकर्मणोविघ्नकर्त्तारइत्यादिना । शाम्यंतुतेघोराणिइतिच । शुभानिवर्द्धतां । शिवाआपःसंतु । संतुतेशिवाआप०। अहोरात्रेशिवेस्यातां । स्यातामहोरात्रेशिवेइतिप्रत्युक्तिः । शव्वः कनिक्रददेवपर्जन्योअभिवर्षत्वोषधःपृतीधीयतां । शन्नोद्यावापृथिवीप्रजाभ्यःशनएधीद्विपदेशंचतुष्पदे ॥ निकामेनिकामे नःपर्ज्जन्यो० ॥ त्वष्टा३४नोदैवियम्० ॥ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाःसर्वेग्रहा प्रीयंतां । प्रीयंतामादित्यपुरोगासर्वेग्रहाःइतिप्रयुक्तिः । एवमग्रेप्येकवचनेन । भगवान्नारायणःप्रीयतां । भगवान्पर्जन्यः प्रीयतां । भगवान्स्वामीमहासेनप्रीयतां पुरोनुवाक्ययायत्पुण्युंतदस्तु । याज्ययायत्पुण्यंतदस्तु । वषट्कारेणयत्पुण्यं तदस्तु । प्रातःसूर्योदये०अभिवादयामिसहशिष्यैः । आयुष्यानभवसहपुत्रैः ॥ इतिप्रत्युक्तिः । पुण्याहकालोवाचयिष्ये।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाच्यतां ॥ ॥ ब्राह्मंपुण्यंमहर्यच्चसृष्टुत्पादनकारकं । वेदवृक्षोद्भवंनित्यंतत्पुण्याहंभवंतुनः । ब्राह्मणाःममास्मिनमहारुद्र कर्मणिपुण्याहंभवंतोब्रुवंतु । इतित्रिर्वाच्यं । पुण्याहंपुण्याहंपुण्याहंइतिप्रत्युक्तिः । मह्यंसकुंटुबिनेब्राह्मणान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणायमहारुद्रकर्मणिपुण्याहमित्यादि । एवंवाप्रार्थयेत् ॥ उद्गातेवशकुने० ॥ पूनंतुमादेवजनाः० ॥ पुनानःसोमा० ॥ ॥पृथिव्यामुध्रतायांतु० ॥ अहोब्राह्मणाः ॥ ममास्मिन्महारुद्रकर्मणिकल्याणंभवंतोब्रुवंतु। इतित्रिः॥ अपाःसोममस्तमिंद्रयथेमांवाचंकल्याणिमा० ॥ काऽऽयान० ॥ ॥ सागरस्यतुयारूद्धिर्म० ॥ ब्राह्मणाःममास्मि०॥ ऋद्धिंभवतो॥३॥ ऋध्यामस्तोमं॥ सत्रस्यऋद्धिरस्य०॥ औहोवाऔहोवाऔहो३वा॥ ॥स्वस्तिर्यायाविनाशाख्या०॥ ब्राह्मणाःममास्मि०॥ भवंतोब्रुवंतु ।३।स्वस्ति।३।स्वस्तिरिद्धिम०॥ स्वस्तिनइंद्रो०॥ त्रातारमिंद्रमविता० ॥ ततःउत्तर कलशंदक्षिणहस्तेदक्षिणकलशंवामहस्तेगृहीत्वाताभ्यांधाराद्वयंसंततंपात्रेनिषिंचेन्मंत्रेण । वास्तोष्पतमितिवसिष्ठोजगती वास्तोष्पतिः । धाराद्वयनिषेकेविनियोगः । वास्तोष्पते०। चतुष्पदे । ततःकर्त्तुर्वामभागेपत्नीमुपवेश्यपात्रपातितजलेन पल्लवदूर्वाभिरुदङ्मुखास्तिष्ठंतोभिषिंचेयुरापोहिष्ठेत्यादिमंत्रैःसुरास्त्वेत्यादयोअभिषेकलिंगकामंत्राः । ततःआशीर्वादः॥ ॥ इतिस्वस्तिवाचनं ॥ ॥ अथकौतुकबंधः ॥ ॥ आचार्योदर्भमयकूर्चेउदकुंभंनिधाय तदुत्तरसाक्षतंकांस्यपात्रंनिधाय तत्रपंचगुणीकृतंसूत्रंनिधाय तत्समीपेप्राङ्मुखयजमानमुपवेश्यकुशहस्तःकुशोदकेनमंत्रैःसूत्रमभिषिंचेत् । पूर्वंगायत्र्या। अग्निमीले । इषेत्वा । अग्नआयाहि । शन्नोदेवी । आपोहिष्ठा । एतोन्विंद्र । ऋतंचसत्यं । राक्षोघ्नमंत्राः । कृणुष्वपाजः॥ सहस्रशीर्षा। हिरण्यवर्णा । यज्जाग्रतः । एवंसूत्रमभिषिंच्यजातवेदसइतिमंत्रेण चंदनेनसूत्रंविलिप्यत्वंयविष्ठइतिएरक्षतनां इतियजमानस्यपत्न्याश्चहस्तेबध्नीयात् । ततःकर्मसाद्गुण्यार्थंदक्षिणांदद्यात् ॥ ॥ इतिकौतुकबंधः ॥ ॥ ततःफलहस्तो यजमानआचार्यादीनृत्विजान्प्रार्थयेत् । ब्राह्मणाःसंतुमेशांताःपापात्पांतुसमाहिताः । देवानांचैवदातारस्त्रातारःसर्व देहिनांजपयज्ञैस्तथाहोमैर्दानैश्चविविधैःपुनः । देवानांचपितॄणांचतृप्त्यर्थंयाजकाःकृताः । येषांदेहेस्थितादेवाःपावयंति जगत्त्रयंरक्षंतुसततंतेमांजपयज्ञेव्यवस्थिताः । महारुद्रजपेपूज्याःसंतुमेनियमान्विताःअक्रोधनाःशौचपराःसततंब्रह्मचा-

रिणाःरुद्रध्यानपरानित्यं प्रसन्नमनसःसदा । दुरीतौघप्रशमकाः सर्वाभीष्टस्यसाधकाः ॥ माश्लीलभाषिणःसंतुमासंतु परनिंदकाः । ममापिनियमाविघ्नाभवंतुभवतामपि । एवंद्विजान्संप्रार्थ्य फलमग्रेनिधायप्रणमेत् ॥ ॥ इतिप्रार्थना॥ ॥ ततोगणपतिपूजा ॥ ॥ सायथा ॥ ॥ पूजाद्रव्याणिस्वदक्षिणेसंस्थाप्यस्वाग्रेपीठोपरिरक्त वस्त्रमास्तीर्यतदुपरिगंधेना क्षतैर्वाअष्टदलंविधाय । आचम्यप्राणानायम्य ताम्रपात्रेशुद्धोदकमापूर्य तत्रचंदनपुष्पाक्षतानिनिक्षिप्य॥ तत्पुरुषायविद्महे वक्रतुंण्डायधीमहि । तन्नोदंतीप्रचोदयात् । इतिगणपतिगायत्र्यातज्जलमभिमंत्र्य तेनजलेनपूजा सामग्रीगणेशगायत्र्या संप्रोक्ष्यदेशकालौसंकीर्त्यमारीप्सितमहारुद्रकर्मणि निर्विघ्नपरिसमाप्तिकामोगणपतिपूजामहंकरिष्ये इतिसंकल्प्य । कर्णि कायांप्रतिमांअक्षतपुंजंवा निधायतत्रगणपतिमायाहयेत् ॥ आतूनहतिसामपठित्वारक्तंरक्तवस्त्रांगरागान्वितं चतुर्भुजं त्रिनेत्रंगजाननंनागयज्ञोपवितिनंशशांककृतशेखरं दंताक्षमालापरशुमोदकहस्तंध्यात्वा श्लोकैरावाहयेत् ॥ हेहेरंबत्वमेह्येहि अंबिकात्र्यंबकात्मज । सिद्धिबुद्धिपतेभ्यक्षलक्षलाभपितुःपिता । नागस्यनागहारस्त्वंगणराजचतुर्भुज । भूषितःस्वायुधै र्दंतपाशांकुशपरश्वधैः । आवाहयामिपूजार्थंरक्षार्थंचममक्रतोः । इहागत्यगृहाणत्वंपूजांक्रतुंचरक्षमे । एवमावाह्यइहागच्छेह तिष्ठेतिसंस्थाप्य प्रतिष्ठामंत्रौपठित्वा अस्मिन्पीठेश्रीगणेशःसुप्रतिष्ठितोवरदोभवतु । ततःॐतत्पुरुषायविद्महेवतुण्डायधी महीतन्नोदंतीप्रचोदयात् ॥ इतिगणपतिगायत्र्याआतूनइतिमंत्रेण ॐगणपतयेनमः । इतिनाममंत्रेणवाउपचारान्कुर्यात्॥ मंत्रमुच्चार्यगणपतयेआसनंसमर्पयामि । एवंपाद्यंसमर्पयामि। अर्घ्यं। आचमनीयं। स्नानं। पुनराचमनीयं। वस्त्रं। पुनरा चमनीयं। उपवीतं। गंधं। पुष्पं। धूपं। दिपं। नैवेद्यं। पुनराचमनीयं॥ नमस्कारः। प्रदक्षिणाततःपुष्पांजलिनाउपचारान् समर्पयेत् । इतिसर्वोपचारैस्तुयन्मयापूजनंकृतंप्रारब्धकर्मसिध्यर्थं देवायकल्पयामितत् । सांगाय श्रीगणेशायपरिवारा न्वितायच । रक्तानिगंधपुष्पाणिधूपदीपयुतानिच । रक्ताच्छादननैवेद्यतांबूलानिफलानिच । सर्वाण्यमृतरूपेणस्वाहा संपाद्यतांतव ॥ ततोनालिकेरेणार्घः ॥ रक्षरक्षगणाध्यक्षरक्षत्रैलोक्यरक्षकभक्तानामभयंकर्त्तात्राताभवभवार्णवात् ॥ द्वैमातुरकृपासिंधोपण्मातुरग्रजोग्रज ॥ वरदत्वंवरंदेहिवांछितंवांछितार्थद । गृहाणार्घमिमंदेवसर्वदेवनमस्कृत । अनेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलदानेनफलदोस्तुसदामम । इत्यर्घ्यंदद्यात् । अथप्रार्थना ॥ विघ्नेश्वरायवरदायसुरप्रियायलंबोदरायसकलायजगद्धि
ताय । नागाननायश्रुतियज्ञविभूषितायगौरीसुतायगणनाथनमोनमस्ते ॥ भक्ताक्तिर्त्तिनाशनपरायगणेश्वरायसर्वेश्वराय
शुभदायसुरेश्वराय । विद्याधरायविकटायच वामनायभक्तप्रसन्नवदानायनमोनमस्ते ॥ नमस्तेब्रह्मरूपायविष्णुरूपायते
नमः । नमस्तेरुद्ररूपायकरिरूपायतेनमः । विरूपायसुरूपायनमस्तेब्रह्मरूपिणे । भक्तिप्रियायदेव यनमस्तुभ्यंविनायकः॥
लंबोदरनमस्तुभ्यंसततंमोदकप्रिय ॥ अविघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा ॥ एवंसंप्रार्थ्यनमस्कृत्य ॥ गणपतेपूजनकृतस्य
विघ्नेःपरिपूर्णमस्तु ॥ ततोगणपतेपूजितोसिक्षमस्वेतिविसर्जयेत् ॥ ॥ इतिगणपतिपूजाप्रयोगः ॥ ॥ अथाचार्यस्तत्रैव
वस्त्रोपरिअक्षतैरष्टदलंकृत्वाकर्णिकायां । वर्द्धनीमृन्मयीस्थापयेत् ॥ भूमिर्भूमिरितिइंद्रऋषिः । यजुः । भूम्यादयोदेवताः ।
भूम्यभिमंत्रणेविनियोगः । भूमिः ।३। इतिसामपठेत् ॥ आविशन्कलशेतिउशनागायत्रीसोमः । कलशनिधानेविनियोगः ।
आविशंकालाद्दशंसुताः । इतिपठित्वा वर्द्धनीस्थापयेत् ॥ अपांव्रतसाआपस्त्रिष्टुप्वापः । पूरणेविनियोगः ॥ हाउ३।
ऐरयत् । इतिसाम्नाशुद्धोदकेनपूर्णं । सोमव्रतस्यसोमः । त्रिष्टुप्सोमः । औषधीप्रक्षेपेविनियोगः । हाउ।३। हौवा३ ।
इतिसामपठित्वाऔषधिप्रक्षेपः । आवोराजेतिवामदेवस्त्रिष्टुप्रुद्रः । हिरण्यप्रक्षेपेविनियोगः । आवोराजाइतिसाम
पठित्वा हिरण्यंप्रतिनिधिद्रव्यंवाप्रक्षिपेत् । अयमूर्जेतिप्रजापतिरनुष्टुबुदुंबरः । पल्लवनिधानेवि० । अयमूर्जेतिपठित्वा
पंचपल्लवानि अस्यामुखेन्यसेत् ॥ इदंवसोइतिगरोगायत्रीवसवः । वस्त्रवेष्टनेवि० । इदंवसोइतिपठित्वाअस्याः कंठेव
स्त्रवेष्टनं । सघातमितिलुशः । पंक्तिःरिद्रः । पूर्णपात्रनिधानेविनि० । सघातंवृषणमितिपठित्वा फलपुष्पाक्षतयुतंपूर्णपात्रं
स्थापयेत् ॥ ततस्तांवर्द्धनीस्पृष्ट्वातीर्थावाहनमंत्रंपठेत् । गंगाद्याःसरितःसर्वास्तीर्थानिजलदानदाः । आयांतुवर्द्धनीसंस्थे
जलेपापौघनाशनः । एवंतीर्थान्यावाह्य । तत्रैववरुणमावाहयेत् । यदाकर्देतिवसिष्ठोबृहतिवरुणः । आवाहनेविनियोगः ।
यदाकर्दाइतिपठित्वा ॥ वरुणमावाहयामि इतिवरुणमावाहयेत् ॥ ततःप्रतिष्ठा ॥ अक्षतानादाय । वाक्मन० । एताएव
समहावताइतिमंत्रद्वयंपठित्वा इयंवर्द्धनीसतीर्थासदैवतासुप्रतिष्ठिताभवतु ॥ इत्युक्त्वाअक्षतास्तदुपरिप्रक्षिप्यचंदनपुष्पा

दिभिःपूजयेत् ॥ वर्द्धन्यैनमः । इदंचंदनंसमर्पयामि । एवंपुष्पंधूपं । दीपं । नैवेद्यं ॥ ततोवरुणमंत्रेणसंपूज्यवर्द्धनीं
प्रार्थयेत् । आधारःसर्वभूतानामादिभूतासिवैयतः ॥ आपोविभर्षिसंशुद्धास्तासुविष्णुःसमास्थितः । तस्मात्वमसि
तद्रूपासर्वकामफलप्रदे । मृन्मयित्वंमहापूतामहातीर्थोदकान्विता । वर्द्धनीत्वंजगन्मातामभवत्वंकुलवर्द्धिनी । तवतोयेन
कलशानजपार्थंपूरयाम्यहं ॥ ॥ इतिवर्द्धनीस्थापनपूजनादि ॥ ॥ ततोयथाविधिनामंडपसकलीकरणंवास्तुपूजनंच
कार्यं ॥ तदनंतरंपूर्वस्थापितांवर्द्धनींयजमानः समादायपुण्याहंवेदमंगलघोषेणसहमंडपस्य पश्चिमद्वारेणप्रविश्यमध्यवेद्यु
परिआग्नेय्यांदिशिमृत्तिकादिनिधाय तदुपरितांस्थापयेत् । ततोवेद्यामेकादशकुंभान्पूर्वोक्तकलशस्थापनविधिनास्थाप-
येत् ॥ तत्रवर्द्धनीस्थजलेनकलशानांपूरणं । तवतोयेनकलशानितिपूर्वोक्तवाक्यात् । ततो । कलशानभिमंत्रयेत् ॥
॥ कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रिताः ॥ मूलेतस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः कुक्षौतुसागराःसप्त सप्तद्वीपा
वसुंधराअर्जुनीगोमतीचैवयमुनाचसरस्वती । कावेरीकृष्णवर्णाचगंगाचैवमहानदी । पृथिव्यांयानितीर्थानिकलशेतानिवै
सदाऋग्वेदोथयर्जुवेदःसामवेदोह्यथर्वणः । अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः ॥ ॥ ततःकलशप्रार्थना ॥ ॥ देव
दानवसंवादेमथ्यमानेमहोदधौ ॥ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं । त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः॥
त्वयितिष्ठंतिभूतानित्वयिप्राणाप्रतिष्ठिताः ॥ शिवःस्वयंत्वमेवासित्वं विष्णुत्वंप्रजापतिः ॥ आदित्यावसवोरुद्राविश्वेदेवाः
सपैतृकाः ॥ त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदः ॥ त्वत्प्रसादादिमंयज्ञंकर्त्तुमीहेजलोद्भव ॥ सानिध्यंकुरुदेवेशप्रसन्नो
भवसर्वदा ॥ ॥ अथतेषुकलशेषुरुद्रःप्रतिमाःस्थापयेत् ॥ तत्रादौमूर्त्तीनामग्न्युत्तारणंतच्चेत्थं ॥ अश्वादिस्थानस्थाभिः
पंचमृद्भिःस्योनापृथिवीतीमंत्रेणप्रतिमाप्रक्षालनं ॥ ततःस्वस्वमंत्रैःपंचामृतेनप्रक्षालनंततःपंचगव्येन । तत्रगायत्र्यागोमूत्रेण
गावश्चिदितिगोमयेन । ततोदुग्धदधिघृतैः स्वस्वमंत्रेणागावश्चिदितिगोमयेन । ततोदुग्धदधिघृतैःस्वस्वमंत्रेण । ततः
प्रतिमांताम्रादिपात्रेनिधाय अग्नआयाहिवीतयेइत्यादिदशतिसमाप्तियावदविछिन्नाजलधारां पातयन्नग्निपदंविहायत्रिवारं
पठित्वा चतुर्थ्यामावृत्तौयथास्थितमग्निपदयुक्तांदशर्तिपठेत् । एवमग्न्युत्तारणंकृत्वास्थापितकलशानामुपरिप्रतिमाःसन्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यतासुपतिमासुरुद्रानावाहयेत् । रुद्रइहागच्छेहतिष्ठ ॥ अघोरइहागच्छेहतिष्ठ। पशुपतेइहागच्छेहतिष्ठ। विरुपइहागच्छेहतिष्ठ
विश्वरूपइहागच्छेहतिष्ठ । त्र्यंबकइहागच्छेहतिष्ठ। कपर्दिनइहागच्छेहतिष्ठ । शूलपाणेइहागच्छेहतिष्ठ। भैरवइहागच्छेहतिष्ठ।
ईशानइहागच्छेहतिष्ठ ॥ मध्यंविभाव्यगंगेचयमुनेचैवगोदावरिचसरस्वती । नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिंकुरु
इतिगंगादितीर्थान्यावाह्य दक्षिणकराग्रेणपादक्षिण्येनावावर्तनं । धेनुमुद्रायाअमृतीकृत्वाहस्तेनजलमादाय दशाक्षरमंत्रेण
दशधाभिमंत्र्यअस्त्रायफट् इतिपरितःप्रक्षेपेणात्मरक्षा । ततस्तत्पुरुषायविद्महेमहादेवायधीमहितन्नोरुद्रप्रचोदयात् ।
इतिरुद्रःगायत्र्यामज्जनं । ततोदेवंध्यायंस्तेनैवोन्मज्जनं ॥ ततोद्विराचमनं । ततआवोराजेतिमंत्रेणदशधाशिरोभिषिच्य
ॐनमोभगवतेरुद्रायइत्येकादशवारमभिषिंचेत् ॥ ततस्तर्पणादिततोरुद्रगायत्र्यातर्पणादि । ततःसंध्यावंदनादि । तत
तस्ताम्रपात्रेअक्षतकुसुमचंदनजलानिकृत्वा रुद्रगायत्रीमुच्चार्ययेदेवादेवाः दिविषट्इत्यादीनिषट्पदानिपठित्वा रुद्ररूपाय
सूर्यायार्घसमर्पयामि इतित्रिरर्घ्यंदत्वाएतैरेवमंत्रैःसूर्यमुपस्थाययथाशक्तिरुद्रगायत्रींजपेत् । ॐतत्पुरुषायविद्महेमहादेवाय
धीमहितन्नोरुद्रःप्रचोदयात् । इतिजप्त्वाअनेनरुद्रगायत्रीजपेनश्रीरुद्रःप्रीयतांइतिजपंनिवेद्य । श्रीमहारुद्रंस्वहृदिध्यात्वा
गृहमागच्छेत् ॥ ॥ इतिरुद्रस्नानम् ॥ ॥ अथपूजाप्रयोगः ॥ ॥ तत्रपूजास्थानंप्रत्यागत्यआसनमास्तीर्यतिर्थोदकेनार्घ
पात्रंसंपूर्यतत्रगंधादिनिक्षिप्यतज्जलं दशाक्षरमंत्रेणाभिमंत्र्यकिंचिदादायस्वशिराःप्रोक्ष्य द्वारपूजाद्रव्याणि भूमिंचसंप्रोक्ष्य
द्वारपालान्पूजयेत् । दक्षिणशाखायां । धात्रेनमः । वामेविधात्रेनमः । ऊर्ध्वंदेहल्यैनमः । अधःअधोदेहल्यैनमः ।
श्रीमहारुद्रद्वारपेभ्योनंद्यादिभ्योनमः । इतिसपूज्य नैऋत्यांवास्तुपुरुषायनमः । ब्रह्मणेनमः । बायव्येविनाकायनमः ।
इतिसंपूज्यआसनस्थाने । आधारायनमः । आधारशक्तयेनमः । सर्वशक्तिकमलासनायनमः इतिसंपूज्य तत्रासन
मास्तीर्य । पृथिव्यामेरुपृष्ठऋषिः । सुतलंछंदः । कूर्मोदेवताआसनोपवेशनेविनियोगः । ॐपृथ्विवत्वयाधृतालोका
देवित्वंविष्णुनाधृता । त्वंचधारयमांदेविपवित्रंकुरुचासनं । इतिमंत्रेणासनेउपविशेत् । स्ववामेशुद्धोदकःकलशः ।
दक्षिणेपूजाद्रव्याणि । वामदक्षिणयोर्दीपद्वयं । ततोहस्तेसर्षपाक्षतानादाय ॥ अग्नेरक्षेतिवसिष्ठोगायत्र्यग्निः ।

भूतोत्सादनेविनियोगः । अग्नेराक्षाइतिपठित्वा । अपसर्पंतुयेभूतायेभूताभूविसंस्थिताः । येभूताविघ्नकर्त्तारस्ते
नश्यंतुशिवाज्ञया ॥ इतिमंत्राभ्यामक्षतप्रक्षेपेणविघ्नानुत्सार्य । ॐनमोभगवतेरुद्रायेति दशाक्षरमंत्रेणप्राणानायम्य ।
देशकालौसंकीर्त्युअशेषपापक्षयकामोहं श्रीमहारुद्रप्रीतयेयथोपपन्नैरुपहारैपूजनमहंकरिष्ये । ततःस्ववामेगुरुभ्योनमः ।
परमगुरुभ्योनमः । परमेष्ठीगुरुभ्योनमः । दक्षिणेगणपतयेनमः । दुर्गायैनमः ॥ क्षेत्रपालायनमः । योगिनीभ्यो
नमः । अवज्यामिवधन्वनोवितेति श्रीशिवायनमः । इतिनमस्कृत्य । अपसर्पंत्वितिपार्ष्णिघातत्रयं । ततोभूमि
भूमिरितिसाम्नः इंद्रोयजुर्भूम्यादयोदेवताः । भूम्यभिमंत्रणेविनियोगः । भूमिः॥३॥ स्योनापृथिवीतिमंत्रेणपृथिवीं
संपूज्य स्योनापृथिवीतीमेधातीथित्परउष्णिक्पृथिवी । पूजनेविनियोगः ॥ स्योनापृथिवीतिमंत्रेणपृथिवींसंपूज्यप्रार्थ
येत् । इद्राद्यैःपुजितासित्वमंधर्मविजिगीषयासौभाग्यंदेहिपुत्रांश्चधनंधान्यंशुभांमति ॥ एवंसंप्रार्थ्य । ॐनमोभगवते
रुद्राय । इतिदशाक्षरमंत्रंसंजप्यशुद्धस्वरूपमात्मानंशिवरूपंध्यायेत् ॥ ॥ अथएकादशन्यासः ॥ ॥ इममिंद्रेतिगौतमो
नुष्टुबिंद्रः ॥ अग्निंदुतेतिभरद्वाजोगायत्र्यग्निः । नेत्रयोर्न्यासेविनियोगः । सामपठित्वागौतमभरद्वाजाभ्यांनमः ।
नेत्रयोः । असाविसोमेतिविश्वामित्रोनुष्टुबिंद्र । पिबासुतस्येतिजमदग्निर्बृहतींद्रः । कर्णयोर्न्यासेविनियोगः । असावि
सोमइंद्ररते० ॥१॥ पिबासुतस्यसिनः । मध्वा० ॥१॥ विश्वामित्रजमदग्निभ्यांनमः ॥ कर्णयोः ॥ इममितिवसिष्ठोनुष्टु
बिंद्रः । कश्यपस्येतिकश्यपोनुष्टुबिंद्रः ॥ नासिकायांन्यासेवि० । इममींद्रसुतंगीब ।१। कश्यपस्यसुवर्विदा६ए ॥१॥
वसिष्ठकश्यपाभ्यांनमः । बृहद्वयेतिअत्रिरनुष्टुबग्निः ॥ जिह्वायांन्यासेवि० । बहद्वयाःहिंभाना २३वाइ० ॥१॥ अत्रये
नमः । वाचि ॥ ॥ इतिसप्तर्षिन्यासः ॥ प्रथमः ॥ ॥ अग्नःआयाहिवीतिगोतमोगायत्र्यग्निः । अग्नआयाहिवीइति
कश्यपोगायत्र्यग्निः ॥ शिरसेन्यासेवि० । अग्नआयाहीवीतयेगृणानो० ॥१॥ गायत्र्यैनमः ॥ अग्नयेनमः । शिरसि ।
पुरुत्वेतितोदउष्णिगग्निः । उदुत्यमितिसूर्योगायत्रीसूर्यः । ग्रीवायांन्यासेवि० । उष्णिहेनमः । सवित्रेनमः । ग्रीवायां ।
अग्नर्उजिष्टेनियथोनुष्टुबग्निः । उद्बातेजाइतिअजिजोगायत्रीसोमः । जिह्वायांन्यासेवि० । अनुष्टुप् । छंदसेनमः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोमायनमः । वाचि। यज्ञायज्ञाइतिभरद्वाजोबृहत्यग्निः । सोमोराजेतिबृहत्पतिरनुष्टुप्लिंगोक्ताः । ककुदिन्यासेवि०।
बृहत्यैनमः बृहस्पतयेनमः । ककुदि। अग्निनरइतिमरयोविराडग्निः आनोमित्रा वरुणोतिमित्रावरुणौगायत्रीमित्रावरुणौ
हृदिन्यासेवि० । विराट्छंदसेनमः । मित्रावरुणभ्यांनमः । हृदि । मूर्द्धानंदिवइतिअग्निर्वैश्वानरस्त्रिष्टूबग्निः । एंद्रसानसि
मितिरोहितकुलीयोगायत्रींद्रः । नाभौन्यासेवि० । त्रिष्टुभेनमः । इंद्रायनमः। नाभौ। श्रत्रेदधामितिशिखंडीजगतींद्रः ।
अग्निरुत्रुतिबृहदुक्थोबृहतीविश्वेदेवाःकट्यांन्यासे०। जगत्यैनमः । विश्वेभ्योदेवेभ्योनमः। कट्यां । विश्वाःपृतनाइति
त्रिशोकोतिजगतींद्रः । कयानश्चित्रेतिवामदेवोगायत्रीप्रजापतिः। गुह्येन्यासे०। अतिछंदसेनमः। प्रजापतयेनमः । गुह्ये।
वीहायवइतिकल्माषोगायत्रीविश्वेदेवाः । वातआवातितिकाशीतोगायत्रीवायुः । पायौन्यासे० । विछंदसेनमः । वायवे
नमः। पायौ। अचेत्यग्निरितिधुरोगायत्र्यग्निः । सहस्रशीर्षाइतिपुरुषोनुष्टुप्पुरुषः। जान्वोर्न्या०। द्विपद्यच्छंदोभ्योनमः।
पुरुषायनमः । जान्वो०॥ इंद्रोविश्वस्येतिएकपदागायत्रींद्रः । ब्रह्मजन्यानमितिऋतुस्त्रिष्टुप्ब्रह्मा । गुल्फयोर्न्यासे० ।
एकपद्योनमः । ब्रह्मणेनमः । गुल्फयोः । स्वादोरित्थेतियमःपंक्तिरिंद्रः । इदंवसोइतिगरोगायत्रीवसवः । पादयो
र्न्यासे०। पंक्त्यैनमः। वसुभ्योनमः। पादयोः। त्वमग्नेयज्ञानामितिसुपर्णोगायत्र्यग्निः। शन्नोदेवीरितिकाशीतोगायत्र्यापः॥
सर्वांगेन्यासे० । न्यूनाक्षरेभ्यश्छंदोभ्योनमः । अद्भ्योनमः । सर्वांगे ॥ ॥इतिछंदोन्यासोद्वितीयः ॥ ॥ उपास्मैदवि
द्युतत्यापवमानस्यतेकवइतिबहिष्पवमानस्यर्चांऋषितःकश्यपोवैखानसाऋषयः । पुष्कलऋषिः । गायत्रीछंदः । सोमो
देवताःन्यासेविनियोगः । प्रातःसवनायबहिष्पवमानायनमः । पादयोः । अग्नआयाहिवीतयेइतिहोतुराज्येस्यर्चा
पुष्कलोगायत्रीमित्रावरुणौ । जान्वोर्न्यासे०। होतुराज्यायनमः। मित्रावरुणस्याज्यायनमः। जान्वो०। आयाहिसुषुमाहित
इतितृतियाज्यस्यर्चापुष्कलोगायत्रींद्रः। कट्यांन्यासे०। ब्रह्मणाछंसिनआज्यायनमः। कट्यां । इंद्राग्नींआगतमितिचतुर्था
ज्यस्यर्चापुष्कलोगायत्रींइंद्राग्नी । नाभौन्यासे०। अच्छावाकस्याज्यायनमः । नाभौ । उच्चातेजापुनानःसोमप्रतुद्रवेतिमाध्यं
दिनपवमानस्यर्चापुष्कलामहीयुरुरुयुधाजिदुउशनाऋषयः । गायत्रीबृहतीत्रिष्टुप्वितिछंदांसिसोमोदेवता । गुदेन्यासे

वि० । माध्यंदिनपवमानायनमः । गुदे । प्राणेभ्योनमः । अधः । अभित्वाशूरेतिभरद्वाजःककुबुत्तराबृहतींद्रः ।
त्वामिद्धिहइतिवसिष्ठोबृहतींद्रः । कुक्षौन्यासे०। रथंतरायनमः । बृहतेनमः । कुक्षिद्वये । यत्रावइतिविरूपोबृहतींद्रः
पिबासोमेतिइंद्रोविराडिंद्रः । अंसयोर्न्यासेवि० । वैरूपायनमः । वैराजायनमः । अंसयोः। कयानइतिवामदेवगायत्री
विश्वेदेवाः । हृदयेन्यासेवि०। वामदेवायआत्मरूपायनमः । हृदये । स्वादिष्ठयापवस्वेंद्रमछपुरोजित्यभिप्रियांणीत्या
र्भवपवमानस्यसाध्यादेवादेवः । प्रजापतिःश्यावाश्वांयोगुकुत्सऋषयः । गायत्रीककुबुष्णिगनुष्टुप्जगत्यःछंदांसिसोमो
देवता । मुखेन्यासेवि०। तृतीयसवनायनमःमुखे। विदामघवन्निति इंद्रोविराट्पुरीषपदानांपदपंक्तिरिंद्रः । रैवतस्य
प्रजापतिर्गायत्रिंद्रः । नेत्रयोर्न्यासे०। शाक्वरायनमः । रैवतायनमः । नेत्रयोः । यज्ञायज्ञीयस्यअग्निर्वैश्वानराबृहत्यग्निः।
मूर्ध्निन्यासे०। यज्ञायज्ञीयायज्ञरूपत्यनमः । मूर्ध्नि ॥ ॥ इतियज्ञसाम्नांन्यासस्तृतीयः ॥ ॥ ॐकारायनमः। ब्रह्मणेनमः।
नाभौ। उकारयनमः। विष्णवेनमः। हृदिः। मकारायनमः। शिवायनमः। मूर्ध्नि॥ ॥ इतिदेवतान्यासश्चतुर्थः ॥ ॥ ॐभूः
ऋग्वेदायपृथ्वीरूपायनमः। मुखे। भुवाययजुरूपायांतरिक्षायनमः। लालटे। स्वायस्वर्गरूपायसामवेदायनमः। शिरसी॥
॥ इतिभूरादीनांन्यासः । पंचमः ॥ भ्राजभ्राजेतिस्त्रिष्टुबग्निः । शिरोन्यासे० । सम्रांतेशिरसेस्वाहा ॥ अदर्दरुतिरि
उरुक्षयस्त्रिष्टुविंद्रः । शिखान्या०। सामपठित्वांशिखायैवषट् । आमंद्रैरितिवम्रोबृहतींद्रः । कवचन्यासे०। सामपठित्वा
कवचायहुं ॥ इदंविष्णुरितिमेधाविष्णुर्गायत्रीविष्णुः। नेत्रन्यासेवि० । साम्नेंतेनेत्रत्रयायवौषट् । आबोराजेतिवाम
देवस्त्रिष्टुप्रुद्रःअस्त्रन्यासेविनियोगः । सामांतेअस्त्रायफट् ॥ ॥ इतिषडंगन्यासः । षष्ठः ॥ ॥ ॐकारंस्यब्रह्माऋषिः
दैवीगायत्रीछंदः परमात्मादेवताशिखायांन्यासेविनि०। ॐ३म् । गायत्र्यात्रिश्वामित्रोगायत्रीसविता । शिरसिन्यासे०।
नमस्तोइत्यग्निर्गायत्र्यग्निः। ललाटेन्यासेवि०। रौरवयोधाजययोःरुरुयुधाजितौबृहतीसोमः। नेत्रयोर्न्यासे०।प्राणाप्राणयो।
र्वसिष्ठस्त्रिष्टुविंद्रः । नासिकयोर्न्यासे० । बृहद्रथंतरयोभरद्वाजवसिष्ठौबृहतींद्रः। कर्णयोर्न्यासे०। सेतुसाम्नःप्रजापति
स्त्रिष्टुबात्मामुखेन्यासे०। संतेपयांसीतिसोमोस्त्रिष्टुप्सोमः। जिह्वायांन्यासे०। जराबोधीयस्याग्निर्गायत्रीरुद्रः॥ ग्रिवायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यासे०। व्रतपक्षयोःप्रजापतिस्त्रिष्टुबिंद्रः। स्कंधयोर्न्यासे०। अश्विनोर्व्रतयोरश्विनौबृहत्यश्विनौ। बाह्वोर्न्यासे०। इमाःप्रजाः प्रजापतियजुःप्रजापतिः। मनोजयिदित्यस्यदिशोनुष्टुप्। छंदःविधिदेवाः। हृदयेन्यासे०॥ पिबासुतस्येतिपृष्ठोबृहतींद्रः। पृष्ठेन्यासे०। आजुहोतेतिशावाश्वस्त्रिष्टुबग्निः। नाभौन्यासे० । आतूनइतिपूर्वद्वयोर्गौरीवितउत्तरयोराकूपारोगायत्रींद्रः । कटिकुक्षिन्यासे०। सफयौफलयोर्देवाःप्रजापत्युष्णिक्सोमः वृषणयोर्न्यासे०। श्यावाश्वांधीगवयोःश्यावाश्वांधीगूअनुष्टुप् सोमः। ऊर्वोर्न्यासे०॥ राजनरौहिणयोरिंद्रस्त्रिष्णुबिंद्रः। जान्वोर्न्यासे०। प्रथेतिदिशोनुष्टुप्विश्वेदेवाः। प्रतिष्ठासीतिद्यौ र्जगतीद्यावापृथिव्यौ । पादयोर्न्यासे० । एषोउषाइत्युपागायत्र्यश्विनौ । कवचेवि०। आक्रंदयेतिशर्वस्त्रिष्टुबिंद्रः । अस्त्रे विनि०। मानस्तोकेतिवसिष्ठोजगतिरुद्रः। दिग्बंधेवि०॥ ॥ इत्यंगन्यासः। सप्तमः॥ ॥अथनाममंत्रन्यासेआदौप्रणवोंते नमश्च । ॐरुद्रायनमः शिरसि । ॐत्रिनेत्रायनमः नेत्रयोः । ॐभैरवायनमः कर्णयोः । ॐशंकरायनमः नासिकायां । ॐपशुपतयेनमः मुखे । ॐनीलकंठायनमः कंठे । ॐव्यापकायनमः हृदि । ॐगंगाधरायनमः हस्तयोः । ॐनमः शिवायनाभौ। ॐवामदेवायनमः गुह्ये। ॐत्र्यंबकायनमः जंघयोः। ॐसर्वज्ञायनमः पादयोः। ॐभवोद्भवायनमः जान्वोः॥ ॐवृषारुढायनमः जंघयोः। ॐत्रिमूर्तयेनमः कट्यां। ॐसमस्तश्रीपदायनमः नाभौ। ॐमहादेवाय नमः हृदये। ॐनीलकंठायनमः कंठे। ॐश्रीमुखायनमः मुखे। ॐप्रणवेश्वरायनमः नासिकयो। ॐभैरवायनमः कर्णयोः । त्रिनेत्रायनमः नेत्रयोः। ॐचंद्रशेखरायनमः कपाले। ॐशिवायनमः मस्तके। ॐसदाशिवायनमः शिखायां। ॐनमःशिवायसर्वांगे॥ ॥इतिनाममंत्रन्यासोष्टमः॥ ॥ अथदशाक्षरमंत्रेणनमः॥ ॥ दशाक्षरमंत्रस्य प्रजापतिऋषिः। विराटछंद॥ श्रीरुद्रोदेवतान्यासेविनियोगः॥ ॐनमःनासिकायां। ॐनमोनमः ललाटे। ॐभंनमः मुखे। ॐगंनमः कंठे। ॐवंनमः हृदि। ॐतेंनमःदक्षिणहस्ते। ॐरुनमः वामहस्ते। ॐद्रांनमः नाभौ। ॐयंनमः पादयोः। ॥ सद्योजातमितिमंत्रस्यसद्योजातऋषिः। उपरिष्टाबृहतीछंदः। ब्रह्मादेवता। श्वेतवर्णहंसवाहनपश्चिमवक्त्रपृथिवीतत्व। सृष्टिरूपात्मनेब्रह्मणेनमः। सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः॥

कनिष्टांगुष्टयोगेनपादयोर्न्यसेत्। ब्रह्मजन्यानमितिऋतुस्त्रिष्टुप्ब्रह्मा। न्यासेवि०। ब्रह्मसामसद्योजातायपश्चिमवक्त्राय ब्रह्मरूपिणेनमः। बाणमुद्रा॥ ॥ वामदेवायेत्यस्यवामदेवस्त्रिष्टुप्विष्णुः। कृष्णवर्णगरुडवाहनउत्तरवक्त्रआपस्तत्व स्थितिरूपात्मनेविष्णवेनमः। वामदेवायनमोज्येष्टायनमः श्रेष्टायनमोरुद्रायनमःकालायनमःकलविकरणायनमो बल विकरणायनमो बलायनमो बलप्रमथनायनमःसर्वभूतदमनायनमो मनोन्मनायनमः। अंगुष्टानामिकायोगेनगुह्येन्यसेत्। इदंविष्णुरितिर्विष्णुर्गायत्रीविष्णुः। न्यासेवि०। इदामेसामपठित्वान्यसेत्। वामदेवायउत्तरवक्त्रायविष्णुरूपायनमः। पद्ममुद्रा॥ ॥ अघोरेभ्यइतिअघोरानुष्टुप्रुद्रः। नीलवर्णकूर्मवाहनदक्षिणवक्त्रतेजस्तत्वविश्वरूपात्मनेनमः। अघोरे भ्योथघोरेभ्योघोरघोरंतरेभ्यः॥ सर्वेभ्यःसर्वसर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः। अंगुष्टमध्यमायोगेनहृदयेन्यसेत्। आवो राजेतिवामदेवस्त्रिष्टुप्रुद्रः॥ न्यासेविनि०। साम्नोंतेअघोरायदक्षिणवक्त्रायरुद्ररूपायनमः। त्रिशूलमुद्रा॥ ॥तत्पुरुषायेति तत्पुरुषोगायत्रीसूर्यः। पीतवर्णअश्ववाहनपूर्ववक्त्रवायुस्तत्वचैतन्यात्मनेनमः। ॐतत्पुरुषायविद्महेमाहादेवायधीमहितन्नो रुद्रःप्रचोदयात्। तर्जन्यंगुष्टयोगेनमुखेन्यसेत्। उदुत्यमितिसूर्योगायत्रीसूर्यः। न्यासे०। साम्नोंतेपीतवर्णायअश्व वाहनायपूर्ववक्त्रायवायुस्तत्वायचैतन्यात्मनेनमः। व्यापकमुद्रा॥ ॥ ईशानइत्यस्यईशानोबृहतीसदाशिवः। गोक्षीरवर्ण वृषभवाहनऊर्ध्ववक्त्रआकाशतत्वसर्वव्यापकात्मने ईशानायनमः। ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपति ब्रह्मणोधिपतिर्ब्रह्माशिवोमेस्तुसदाशिवों। लिंगमुद्रयाशिरसिन्यसेत्। अभित्वाशूरेतिभरद्वाजोबृहतीशानः। न्यासेवि० साम्नोंतेगोक्षीरवर्णायवृषभवाहनायऊर्ध्ववक्त्राय आकाशतत्वायसर्वव्यापकात्मनेईशानायनमः॥ ज्ञानमुद्रा॥ ॥इति पंचवक्त्रन्यासोदशमः॥ ॥ अथकलान्यासः॥ ॥ कनिष्टांगुष्टयोगेसद्योजातकलापादयोन्यसेत्॥ रूध्यैनमः। सिध्यै०। धृत्यै०। लक्ष्म्यै०। मेधायै०। कीर्त्यै०। श्रद्धायैनम० प्रभायै०। अनामिकांगुष्टयोगेनवामदेवकलागुह्येन्यसेत्। रजसे०। रक्षायै०। रत्यै०। पाल्यै०। कामायै०। संजीविन्यै०। प्रियायैनमः। बुध्यैन०। क्रियायै०। धान्यै०। भ्रामिण्यैनम०। मोहिन्यै०। ज्वरायै०। मध्यमांगुष्टयोगेनअघोरस्यकलाहृदिन्यसेत्। तमसे०। मोहायै०। क्षमायै०। निद्रायै०। स्मृत्यै०।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मायायै०। अन्नपायै०। जरायै०। तर्जन्यंगुष्ठयोगेनतत्पुरुषकलामुखेन्यसेत्। निवृत्यै०। प्रतिष्ठायैनमः। विद्यायैनम०। शांत्यै०। लिंगमुद्रयाईशानस्यकलामूर्ध्निन्यसेत्। शशिन्यै०। अंगदायै०। इष्टायै०। मरिच्यै०। ज्वालिन्यैः॥ ॥ इत्यष्टत्रिंशत्कलान्यासएकादशः॥ ॥ ततःसंपुटीकरणं। त्रातारमितिगर्गस्त्रिष्टुबिंद्रः। संपुटीकरणेविनियोगः। एवंसर्वत्र ऋचंपठित्वा इंद्रायनमः। अग्निस्तिग्मेनेत्यग्निर्गायत्र्यग्निः। संपु०। अग्नयेनमः। नाकेसुपर्णमितिवेनस्त्रिष्टुप्यमः। संपुटी०। यमायनमः। वेत्थाहीतिविश्वमनाउष्णिक्निऋतिः। संपुटी०। निर्ऋतयेनमः॥ यदाकदेतिपज्रोबृहतीवरुणः। संपुटी०। वरुणायनमः। वातआवातिवितिउपलोगायत्रीवायुः। संपुटी०। वायवेनमः। तवाहंमितिसप्तर्षयोबृहतीसोमः। संपुटि०। सोमायनमः। अभित्वाशूरेतिवसिष्ठोबृहतीशानः। संपुटी०। ईशानायनमः। मयिवर्चः परमेष्ठीप्रजापतिरनुष्टुप्। परमेष्ठी। संपुटी०। ब्रह्मणेनमः। अतोदेवाइतिमेधातिथिगायत्रीविष्णुः। संपुटीकरणेविनियोगः॥ विष्णवे नमः॥ ॥ एतसंपुटमध्यस्थमात्मानंरुद्ररूपंध्यायेत्॥ ॥ अथात्मानंरुद्ररूपंध्यायेत्पंचमुखंशिवं। प्रतिवक्त्रंत्रिनेत्रंच दशहस्तंदशायुधं। कमंडलवक्षसूत्राहिबाणशूरधरंहरं। दंडंडमरुखट्वांगभयपात्रंपिनाकिनं॥ अष्टसिद्धियुतंसौम्यंसर्वाभरणभूषितं। निलग्रीवंशशांकार्द्धशेखरंस्मितसुंदरं॥ शुद्धस्फटिकसंकांशंनागयज्ञोपवीतीनं। गजचर्मपरीधानंव्याघ्रचर्मोत्तरीयकं॥ वृषस्कंधसमारूढमुमादेहार्द्धधारिणं। दुर्दंतंकपिलंजटंशिखामुद्योतकारिणं। अमृतेनाप्लुतंहृष्टंदिव्यभोगसमाकुलं। दिग्देवतैसमायुक्तंसुरासुरैर्नमस्कृतं। शाश्वतंसच्चिदानंदंध्रुवमक्षरमव्ययं॥ अजेयममृतंनित्यंसर्वव्यापिनमीश्वरं॥ एवंरुद्रतनुंसर्वेयक्षराक्षसपन्नगाः। डाकिनीशाकिनीभूतपिशाचाजंभकाग्रहाः। ज्वलंतंतेप्रपश्यंतिप्रलयानलसन्निभं। एवंध्यात्वास्वहृदिचंदनपुष्पधूपदीपनैवेद्यादि पंचमानसोपचारैःसंपूज्य षडंगस्यऋष्यादिस्मरणपूर्वकंरुद्रीजपंऋत्विजःकुर्युः। ऋष्यादयोयथा॥ भ्राजाभ्राजेतिद्वयोःसूर्योगायत्र्यग्निः। शुक्रचंद्रेतिद्वयोःप्रजापतिर्गायत्रीवायुःपूर्वस्योत्तरस्यचंद्रः। राजनरौहिणयोरिंद्रस्त्रिष्टुबिंद्रः। अग्नेव्रतस्यअग्निर्गायत्र्यग्निः। वायोव्रतस्यवायुरत्रष्टिः। सोमः। श्लोकानुश्लोकानांप्रजापतिस्त्रिष्टुबिंद्रोनवृस्तेत्यस्यत्वाष्टा। सेंतुसाम्नाःप्रजापतिस्त्रिष्टुबात्मा॥ ॥ अवोध्यग्निःप्रजापति

स्त्रिष्टुबग्न्युषसौ। महित्रिणाइतिद्वयोः पष्टवाडगायत्रीप्रजापतिः। त्यावृइतिधुरासाकमश्वोगायत्रींद्रः। इंद्रंनरोगौरीवितिस्त्रिष्टुबिंद्रः। सोमःपुनानइतिप्रजापत्युष्णिक्सोमः। ससुइत्यस्यप्रजापतिरुष्णिक्सोमः। विश्वतोदावन्नितिप्रजापतिर्विष्टारपंक्तिरिंद्रः। उदुत्तमंमितिवरुणगोतमौत्रिष्टुप्वरुणादित्यौ॥ ॥ अदर्दरुरितिद्वयोरुक्षयस्त्रिष्टूबिंद्रः। सुष्वाणासइतिद्वयोःपृथुस्त्रिष्टुबिंद्रः। आतुनइतिपूर्वद्वयोगौरीवितगुत्तरयोराकूपारोगायत्रींद्रः। मृज्यमानःसुहस्त्येतिपूर्वस्यउष्णोरध्रःपष्टस्याग्निर्बृहतीसोमः। ॥ आयंद्रेरितित्रयाणांवस्रोबृहतींद्रः। आनोविश्वाइतित्रयाणांवसिष्ठोबृहतींद्रः। प्रसेनार्निरितित्रयाणांकुत्सस्त्रिष्टुपसोमः। पवित्रंतेतिद्वयोरादित्यो जगतीब्रह्मणस्पतिः॥ इंदंविष्णुरितिविष्णुर्गायत्रीविष्णुः। प्रक्षस्यवृष्णोइतिविष्णुर्जगतीवैश्वानरः प्रकाव्यमितिवराहस्त्रिष्टुप्वराहः। सहस्रशीर्षात्रिपादुर्ध्वपुरुषएवेदेतावानस्यततोविराट्कयानश्चित्रइतिषणांपुरुषः पंचानुष्टुप्षष्ठागायत्र्यात्मा॥ ॥ आवोराजेतिवामदेवस्त्रिष्टुपरुद्रः। तद्वोगायेतिरुद्रः पूर्वयोरुत्तरयोर्मृगयुर्गायत्रींद्रः। आज्यदोहत्रयाणांप्रजापतिस्त्रिष्टुप्अग्निर्वैश्वानरः। देवव्रतानांदेवउक्तिरुद्रः। जपेविनियोगः। अभिषेकेविनियोगइत्यभिषेके। एवंआदौषडंगानिजप्त्वारुद्रसंहितायाःनवावृत्तीः कृत्वाअंतेषडंगस्यजपः। एकरुद्रीजपस्यायंप्रकारः अनेकरुद्रीजपेप्येवमेवनुषडंगा न्यस्यजपांतेजपनिवेदनं॥ ॥ इतिरुद्रीजपप्रकारः॥ यजमानस्तुश्रीमहारुद्रस्यध्यानांतेस्वहृदिमहादेवंआवाहयेत्। आवोराजेतिवामदेवस्त्रिष्टुप्रुद्रः। आवाहनेविनियोगः। साम्नेंतेश्रीमहारुद्रअत्रसन्निहिधोभवइतिसन्निध्याप्य। मानस्तोकेति। वसिष्ठोजगतीरुद्रः। आत्मपूजनेवि०। मंत्रांतेस्वहृदिचंदनादिभिर्देवंसंपूज्य स्वहृदिशुभसंज्ञंदेवंध्यायनदशाक्षरंमंत्रंजपेत्। जपंनिवेद्यजलशुद्धिंकुर्यात्। एतोन्विंद्रमितिशुद्धाशुद्धीपयोरिंद्रोनुष्टुबिंद्रः। जलशोधनेवि०। ततःस्ववामेअर्घपात्रंसाधारंसंस्थाप्यरुद्रगायत्र्या। शुद्धोदकेनापूर्यतत्रचंदनपुष्पाक्षतानिनिक्षिप्य। गंगेचयमुनेचैवगोदावरिसरस्वति। नर्मदेसिंधुकावेरिजलेस्मिन्संन्निधिंकुरुइतितीर्थानावाह्यरुद्रगायत्र्यादशाक्षरमंत्रेणचाभिमंत्र्य धेनुमुद्रयाअमृतीकरणंकुर्यात्॥ तेनार्घवारिणात्मानमुपहारांश्चप्रोक्ष्य। सुवस्त्रेपीठादौवा चंदनादिनावृत्ताष्टदलषोडशदल चतुर्विंशतिपत्रद्वात्रिंशद्दलचत्वारिंशद्दलत्रिरेखा चतुर्द्वारोपेतभूगृहात्मकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंत्रंविलिख्यपुरतः सिंहासनोपरिसंस्थाप्य पीठपूजांकुर्यात् । पूजायांसर्वत्रसाध्यसाधकयोरंतःप्राचीदिक्पतिपूजायांनैव । स्वस्वदिक्ष्वेव ॥ ॥ आग्नेय्यांगणपतयेनमः । नैर्ऋत्यांक्षेत्रपालाय० । वायव्यांदुर्गायै० । ऐशान्यांसरस्वत्यै० । पश्चिमे गुरुभ्योनमः । परमगुरुभ्योनमः । परमेष्ठीगुरुभ्योनमः। ततःकर्णिकायां । आधारशक्त्यैनमः । मंडूकाय० । कालाग्नि रुद्राय०। कूर्माय०। वाराहाय०। अनंताय०। पृथिव्यै०। आनंदकंदाय० । अंकुराय०। सविन्नालाय०। सर्वतत्वपद्माय० प्रकृतिमयपत्रेभ्यो०। विकारमयकेसरेभ्यो०। कर्णिकायै०। आग्नेय्यांधर्माय०। नैर्ऋत्यांज्ञानाय०। वायव्यांवैराग्याय०। ऐशान्यांऐश्वर्याय०। प्राच्यांअधर्माय०। दक्षिणेअज्ञानाय०। पश्चिमेअवैराग्याय० । उत्तरेअनैश्वर्याय० । श्वेतरूपाय सत्वाय०।रक्तवर्णायरजसे०। कृष्णवर्णायतमसे०। अग्निमंडलाय०।सूर्यमंडलाय०।सोममंडलाय०।पूर्वस्यांमायातत्वाय० दक्षिणस्यांकलातत्वाय०। पश्चिमेविद्यातत्वाय०। उत्तरेशिवतत्वाय० । आग्नेय्यांआत्मने०। नैर्ऋत्यांअंतरात्मने० वायव्यांजीवात्मने० । ऐशान्यांपरमात्मने०। अथपूर्वाद्यष्टदिक्षुरुद्राय० शर्वाय० पशुपतये० उग्राय० उग्रघनाशाय० भवाय० महादेवाय० ईशानाय० पूर्वाद्यष्टपत्रेषु वामायै० ज्येष्ठायै० रौद्र्यै० काल्यै० कलविकरण्यै० बलविकरण्यै० बलप्रमथिन्यै० सर्वभूतदमन्यै० मध्ये मनोन्मन्यै० ॐनमोभगवतेरुद्राय सर्वात्मसंयोग पद्मपीठात्मनेनमः । ततो दशाक्षरमंत्रेणमध्येलिंगंप्रतिष्ठाप्य आवोराजेतिवामदेवस्त्रिष्टुप्रुद्रः । आवाहनेविनियोगः ॥ आवोराजेतिपठित्वारुद्र गायत्रींपठित्वा देवेशभक्तिसुलभपरिवारसमन्वित । यावत्वांपूजयिष्यामितावदेवइहावह ॥ इतिपठित्वास्थापितलिंग देवमावाह्यमुद्राःप्रदर्श्यस्वागतसुस्वागतेकुर्यात् । यस्यदर्शनमिछंतिदेवाःस्वाभिष्टसिद्धये ॥ तस्मैतेपरमेशायस्वागतं स्वागतंचमे । कृतार्थोस्म्यनुगृहीतोस्मिसफलंजीवितंमम । आगच्छदेवदेवशसुस्वागतमिदंपुनः । तद्वोगायचतुर्णा मृगयुर्गायत्रींद्रः । उपचारेविनियोगः । तद्वौहोवाइत्याद्यंसामपठित्वा शिवायेदमासनंसमर्पयामि पुष्पाद्यासनंदेवं । तद्वोगायाइतिद्वितीयंसामपठित्वा० । शिवायेदंपाद्यंसमर्पयामि । तद्वोगायेतितृतीयंसामपठित्वा० । शिवायेद्यंमर्घ्यं समर्पयामि ॥ ॥ तद्वोगायइतिचतुर्थसामपठित्वा० । शिवायेदमाचमनंसमर्पयामि । चक्रंयदस्येतिअथर्वाविराट्इंद्रः

पयस्नानेवि० । शिवायेदंपयःस्नानंसमर्पयामि । वारुणंस्नानं । ततश्चंदनपुष्पादि । दधिक्रावेतिवामदेवोनुष्टुप् दधिक्रावादधिस्नानेविनि० । शिवायेदंदधिस्नानंस० । ततःपुनःस्नापनादि । घृतवतीइतिवरुणोजगतीद्यावा पृथिव्यौ ॥ घृतस्नानेवि०। शिवायेदंघृतस्नानंस०। पुनस्नानादि । सपूर्वेतिप्रजापतिरनुष्टुबिंद्रः । मधुनास्नापनेवि० । शिवायेदंमधुस्नानंस० । ततःपुनःस्नापनादि । रसंतेतिइषोवृधीयोगायत्रीवरुणः । शर्करास्नाने० । शिवायेदंशर्करा स्नानंस० ॥ ततःपुनर्जलेनसंस्नाप्यचंदनादि । अपांव्रतयोरापस्त्रिष्टुबापः । शुद्धोदकस्नानेवि० । हाउ३ऐरयत् । हाउ३ऐरयत् । आज्यदोहसाम्नामादिर्वैश्वानरः ॥ उपचारेविनि० । प्रथममाज्यदोहंसामपठित्वासंस्नाप्य। सांगरुद्रा ध्यायेनाभिषेकः । दशाक्षरेणशिवायपुनराचमनीयंसमर्पयामि । द्वितीयमाज्यदोहंपठित्वा शिवायेदंकौपीनंस० । ततःपुनराचमनीयं तृतीयंसामपठित्वाशिवायउपवितसम० । अर्चतेतिप्रियमेधानुष्टुबिंद्रः । अर्चत्यर्कंतिमरुत स्त्रिष्टुब्मरुतः । गंधदानेवि० । शिवायेदंगंधंसमर्प० । गायंत्वितित्रयाणांशिखंड्यअनुष्टुबिंद्रः । यक्षकर्दमदानेवि० । शिवायेदंयक्षकर्दमंस० । पवित्रंतेतिआदित्योजगतीब्रह्मणस्पतिः । पुष्पदाने० । शिवायेदंपुष्पंसम० । बिल्वपत्रंस०। त्वेषास्तेतियमोनुष्टुबग्निः । धूपदानेवि० । शिवायेदंधूपंसम० । आयुश्चक्षुरितिवरुणगोतमौत्रिष्टुप्वरुणादित्यौ । दिपदानेवि० । शिवायदीपंसम० । अहमन्नेतिदिशोनुष्टुप्विश्वादेवाः नैवेद्यदानेवि० । शिवायसांगायसपरिवाराय नैवेद्यंसम० । दशाक्षरेणशिवायपुनराचमनीयंसम० ॥ उद्यंलोकेतिइंद्रोनुष्टुप्सूर्यः । आरात्रिकेविनि० । शिवाय आरात्रिकंसम० । फलेतिकश्यपस्त्रिष्टुबिंद्रः । अर्घदानेविनि० । शिवायेदमर्घसम० । देवव्रतानांदेवातिरुद्रः । क्रमेण प्रदक्षिणस्तुतिनमस्कारेविनि०। प्रथमंपठित्वाशिवायंप्रदक्षिणांसम०। द्वितीयंपठित्वा शिवायस्तुतिंसम० । तृतीयंपठित्वा शिवायनमः । इतिनमःस्कुर्यात् ॥ ॥ इतिषोडशोपचारपूजासमाप्तः ॥

॥ अथपंचवक्त्रपूजा ॥ ॥ तत्रपूर्वंश्रीमहादेवस्यवामभागेपार्वतींपूजयेत् । ॐनमोभगवत्यैउमादेव्यैनमः ॥ पार्वत्यै० शंकरप्रियायै० गौर्यै० काल्यै० कालिंद्यै० कोटर्यै० विश्वंभरायै०। विश्वधारिण्यै० गंगादेव्यै० ॥ ॥ चंदन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुष्पादिभिःपूजाकार्या । तत्रादौहाउस्वरेतिप्रजापतिस्त्रिष्टुबिंद्रः । पश्चिमवक्त्रआवाहनेविनियोगः । हाउस्वरता इतिपठित्वा । पश्चिमवक्त्रंआवाहयामि । सद्योजातमितिसद्योजातऋषिः । उपरिष्टाद्बृहतीछंदः । ब्रह्मादेवता । पश्चिम वक्त्रपूजनेविनि० । सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः । भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ श्वेतवर्ण हंसवाहनपश्चिमवक्त्रपृथिवीतत्वसृष्टिरूपात्मनेब्रह्मणेनमः ब्रह्मजन्यानमितिऋतुस्त्रिष्टुप् ब्रह्मापश्चिमवक्त्रपूजनेविनियोगः। साम्नोतेब्रह्मणेनमः । ततःकलाःपूजयेत् ॥ ऋध्यै० सिध्यै० धृत्यै० लक्ष्म्यै० मेधायै० कांत्यै० श्रद्धायै० प्रभायै०। श्वेतं चंदनं । श्वेताक्षताः। श्वेतपुष्पाणि । सघृतगुगुलुधूपघृतदीपःसर्वत्र । पायसनैवेद्यं। श्वेताक्षतैःश्वेतपुष्पैश्चपूजयेत्हंसवाहनं। प्रालेयामलबिंदुकुंदधवलं गोक्षीरफेनप्रभं भस्माभ्यंगमनंगदेहदहनं ज्वालावलीलोचनं । ब्रह्मेंद्रादिमरुद्गणैस्तुतिपरै रभ्यर्चितंयोगिभिर्वंदेहंसकलंकलंक रहितं स्थाणोर्मुखंपश्चिमं । श्रीमहारुद्रायश्वेतवर्णाय हंसवाहनायपृथिवीतत्वायसृष्टि रूपात्मनेब्रह्मरूपिणेपश्चिमवक्त्राय अष्टकलासहितायनमः बाणमुद्रयानमस्कारः॥ ॥ इतिपश्चिमवक्त्रपूजा ॥ ॥ अथोत्तर वक्त्रपूजा ॥ प्रक्षस्यविष्णोइतिविष्णोर्व्रतंसामविष्णुर्ऋषिः । जगतीछंदः । विष्णुर्देवता । उत्तरवक्त्रआवाहनेविनियोगः। साम्नोतेउत्तरवक्त्रआवाहयामि । वामदेवायेतिवामदेवस्त्रिष्टुपविष्णुः । उत्तरवक्त्रपूजनेविनियोगः । वामदेवायनमो ज्येष्ठायनमःश्रेष्ठाय नमोरुद्रायनमःकालायनमःकलविकरणाय नमोबलविकरणाय नमोबलाय नमोबलप्रमथनाय नमःसर्वभूतदमनायनमोमनोन्मनायनमः ॥ नीलवर्णगुरुडवाहन उत्तरवक्त्रआपतत्वस्थिति रूपात्मनेविष्णवेनमः । इदंविष्णुरितिविष्णुर्गायत्रीविष्णुः । उत्तरवक्त्रपूजने० । सामपठित्वाविष्णवेनमः । ततःकलाःपूजयेत् । रजसे० रक्षायै० रत्यै० पाल्यै० कामायै० संजीविन्यै० प्रियायै० बुध्यै० क्रियायै० धान्यै० भ्रामिण्यै० मोहिन्यै० ज्वरायै० हरिचंदनंतुलसीपत्राणि पुष्पाणिसिताज्यमधुसंयुक्तं गुगुल्वगुरुचंदनंषडंगं धूपमेततुसर्वदेवप्रियंकर मितिवाक्योदितःषडंग धूपः । घृतपक्वविविधंगोधूमान्नकृतनैवेद्यं । ततोध्यात्वातुलसीशतपत्रैश्चपूजयेत् । गरुडध्वजंगौरकुंकुमपिंजरंसुतिलकं व्यापांडुगंडस्थलंभ्रूविक्षेपकटाक्षविक्षणलसत्संतक्तकर्णोज्वलं । स्निग्धंबिंबफलाधरंप्रहसितंनीलालकालंकृतंवंदेपूर्णशशां

कमंडलनिभंवक्त्रंहरस्योत्तरं । भगवतेमहारुद्रायनीलवर्णायगरुडवाहनाय अप्तत्वाय विष्णुरूपिणे रजादित्रयोदश कलासहिताय वामदेवाभिधाय उत्तरवक्त्रायनमः पद्ममुद्रयाप्रणमेत् ॥ इतिउत्तरवक्त्रपूजा ॥ ॥ अथदक्षिणवक्त्रपूजा ॥ ॥ जरावोधेतिअग्निर्गायत्रीरुद्रः । दक्षिणवक्त्रआवाहनेविनियोगः । जराइतिसामपठित्वा दक्षिणवक्त्रंआवाहयामि ॥ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यःसर्वेभ्यःसर्वसर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ कृष्णवर्णकूर्मवाहनतेजस्तत्वात्मने रुद्रायनमः । आघोराजेतिवामदेवस्त्रिष्टुप्रुद्रः ॥ दक्षिणवक्त्रपूजनेविनियोगः ॥ सामपठित्वारुद्रायनमः । ततःकलाः पूजयेत् ॥ तमसे० मोहायै० क्षमायै० निद्रायै० स्मृत्यै० मायायै० अभयायै० ज्वरायै०। कृष्णागुरुचंदनं । नीलोत्पल करवीरपुष्पाणि। सितागुरुधूपः। माषान्नविविधंघृतपक्वंनैवेद्यं । ततोध्यानं। निलोत्पलैःकरवीरैपूजयेत्कूर्मवाहनं। कालाभ्र भ्रमरांजनाद्युतिनिभं व्यावृत्तपिंगेक्षणं खंडेंदुद्वयनिस्तृतांशुदशनप्रोद्भिन्नदंष्ट्रांकुरं। सर्पप्रोतकपालशुक्तिशकल व्याकीर्णमा शेखरं वंदेदक्षिणमीश्वरस्यवदनंभ्रूभंगरौद्रंमुखं । भगवतेमहारुद्रायकृष्णवर्णायकूर्मवाहनाय तेजस्तत्वायविश्वरूपात्मने तेजस्करायाविघ्नायसर्वबाधाविनाशनाय अष्टकलासहितदक्षिणवक्त्रायनमः ज्ञानमुद्रांबध्वानमस्कुर्यात् ॥ ॥ इति दक्षिणवक्त्रपूजा ॥ ॥ अथपूर्ववक्त्रपूजा ॥ ॥ सहस्रशीर्षेतिपुरुषोनारायणऋषिः अनुष्टुप्छंदः । परमात्मादेवतापूर्व वक्त्रंआवाहनेविनियोगः । उहुवाहाउ । सहस्रशीर्षाइतिपठित्वा पूर्ववक्त्रंआवाहयामिइत्यावाह्य । तत्पुरुषायेतितत्पुरुषो गायत्रीसूर्यः । पूर्ववक्त्रपूजनेवि० । तत्पुरुषायविद्महेमहादेवायधीमहितन्नोरुद्रःप्रचोदयात् । रक्तवर्णायअश्ववाहनाय पूर्ववक्त्रायवायुस्तत्वायचैतन्यात्मनेसूर्यरूपायनमः । उदुत्यमितिसूर्योगायत्रीसूर्यः । पूर्ववक्त्रपूजनेविनि०। सामपठित्वा सूर्यायनमः । ततःकलापूजयेत् । निवृत्यै० प्रतिष्ठायै० विद्यायै० शांत्यै०। रक्तचंदनं ॥ दुर्वांकुरार्कपुष्पाणि॥ कृष्णागुरु धूपः। सगुडोदनंनैवेद्यं ॥ वक्षमाणस्वरूपंध्यात्व॥ दुर्वांकुरेरर्कपुष्पैश्चपूजयेदश्ववाहनं । संवर्ताग्नितडित्प्रतप्तकनकं प्रस्पर्द्धि तेजोरुणं गंभीरस्मितनिःश्रुतांशुदशनप्रोद्भासिताम्राधरं । बालेंदुद्युतिलोलपिंगलजटा भारप्रबद्धोरगं वंदेसीद्धसुरासुरेंद्रन मितं पूर्वमुखंशूलिनः। भगवतेमहारुद्रायरक्तवर्णाय अश्ववाहनायवायुस्तत्वायचैतन्यात्मनेइष्टफलदात्रेचतुः कलासहिताय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्ववक्त्रायनमः॥ कवचमुद्रांप्रदर्श्यनमस्कुर्यात् ॥ ॥ इतिपूर्ववक्त्रपूजा॥ ॥ अथोर्ध्ववक्त्रपूजा॥ ॥ आघोराजेतिवामदेव
स्त्रिष्टुप्रूद्रः । ऊर्द्धवक्त्रआवाहनेविनियोगः । आघोराजेतिसामपठित्वा ऊर्द्धवक्त्रंआवाहयामि । ईशानइत्यस्यईशानो
बृहतीसदाशिवः। ऊर्ध्ववक्त्रपूजनेवि० । इशानःसर्वविद्यानामिश्वरःसर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपति र्ब्रह्माशिवोमे
अस्तुसदाशिवों॥ सामपठित्वा ईशानायनमः। ततःकलापूजयेत् ॥ शशिन्यै० अंगदायै० इष्टायै०मरिच्यै०ज्वालिन्यै०
श्वेतंचंदनं। बिल्वपत्राणिकनकपुष्प॥ शुद्धचंदनस्यधूपः शर्करादध्योदनंनैवेद्यं। वक्षमाणप्रकारेणध्यात्वाबिल्वैः कनकपुष्पै
श्चअन्यैर्ऋतुभवैस्तथा। शुद्धस्फटिकसंकाशं पूजयेद्वृषभध्वजं। व्यक्ताव्यक्तगुणोत्तरंचवरदं षट्त्रिंशतत्वाधिकं तस्मादुत्तर
तत्वमक्षयगति र्ध्येयंसदायोगिभिः। वंदेतामसवर्जितेन मनसा सूक्ष्माति सूक्ष्मंपरंशांतं पंचममोश्वरस्यवदनं खव्यापितेजो
मयं। भगवतेमहारुद्रायगोक्षीरवर्णाय वृषभवाहनाय आकाशतत्वायसर्वव्यापकात्मनेशुद्धस्फटिकनिर्मलाय शशिमौलिने
सौख्यमोक्षप्रदाय पंचकलासहिताय ऊर्ध्ववक्त्रायनमः । व्यापकमुद्रांप्रदर्श्यनमस्कुर्यात् ॥ ॥ इतिऊर्ध्ववक्त्रपूजा ॥
इतिपंचवक्त्रपूजा॥ ॥अथावरणपूजा॥ ॥सायथा॥ कर्णिकायां। "ॐनमोभगवतेरुद्राय" इतिश्रीमहारुद्रंसंपूज्यकर्णिका
यामेवाप्राच्यांसद्योजाताय० दक्षिणस्यांवामदेवाय० प्रतीच्यांअघोराय० उत्तरस्यांतत्पूरुषाय० मध्येईशानाय० ततो
दशाक्षरेणपुष्पांजलिः ॥ ॥ तद्बहिरष्टदलेप्रागादिक्रमेणसर्वत्रप्रणवादित्वंनमोंतंच । नंदिने० महाकालाय० गणे-
श्वराय० वृषभाय० भरीरीटये० स्कंदाय० उमायै०चंडीश्वराय०। ततोदशाक्षरेणपुष्पांजलिः ॥ ॥ तद्बहिःषोडशदले
प्रागादि । अनंताय० सूक्ष्माय० शिवाय० एकपदे० एकरुद्राय० त्रिमूर्त्तिये० श्रीकंठाय० वामदेवाय० ज्येष्ठाय०श्रेष्ठाय०
रुद्राय० कालाय० कलविकरणाय०बलाय०बलविकरणाय० बलप्रथमनाय० । ततःपुष्पांजलिः ॥ ॥ बहिश्चतुर्विंशति
दलेप्रागादि । अणिम्ने० महिम्ने० लघिम्ने० गरिम्ने० प्राप्त्यै० प्राकाम्यै० ईशितायै० वशितायै० ब्राह्म्यै० माहेश्वर्यै०
कौमार्यै० वैष्णव्यै०वाराह्यै० ऐंद्र्यै० चामुंडायै० चंडिकायै० असितांगभैरवाय० रुरुभैरवाय०चंडभैरवाय क्रोधभैरवाय०
उन्मत्तभैरवाय० कपालीभैरवाय० भीषणभैरवाय० संहारभैरवाय०॥ ततःपुष्पांजलिः॥ ॥ तद्बहिर्द्वात्रिंशद्दलेप्रागादि ।

भवाय० शर्वाय० ईशानाय० पशुपतये० रुद्राय०उग्राय० भीमाय० महते० अनंताय० वासुकये० तक्षकाय० कुलीराय ०
कर्कोटकाय० शंखपालाय० कंबलाय० अश्वतराय० वैन्याय० पृथवे० हैहयाय० अर्जुनाय० शाकुंतलेयाय० भरताय०
नलाय० रामाय० हिमवते० निषधाय० विंध्याय० माल्यवते० पारियात्राय० मलयाय० हेमकूटाय० गंधमादनाय०
ततःपुष्पांजलि ॥ ॥ तद्बहिश्चत्वारिंशद्दलेः ॥ प्रागाद्येव। इंद्राय०अग्नये० यमाय० निर्ऋतये० वरुणाय० वायव्ये०
कुबेराय० ईशानाय० शांत्यै० स्वाहायै० वाराह्यै० खड्गिन्यै० वारुण्यै० वायव्यै० कौबेर्यै० इशान्यै०वज्राय०शक्त्यै०
दंडाय०खड्गाय०पाशाय० अंकुशाय०गदायै० त्रिशूलाय०ऐरावताय०शेषाय० महिषाय०प्रेताय०मकराय०हरिणाय०
नराय०वृषभाय० ऐरावताय० पुंडरीकाय० वामनाय० कुमुदाय० अंजनाय० पुष्पदंताय० सार्वभौमाय० सुप्रतीकाय०
ततःपुष्पांजलि ॥ ॥ चतुरस्रमध्येप्रतिदिशिपूर्वादि । पूर्वेइंद्राय० अग्नेय्यांअग्नये० विरूपाय० दक्षिणेयमाय० नैर्ऋत्यां
निर्ऋतये० विश्वरूपाय० पश्चिमेवरुणाय० वायव्यांवायवे० पशुपतये० उत्तरेकुबेराय० ईशान्यांईशानाय० ऊर्ध्वलिंगाय॥
॥६॥ ॥ भूगृहाद्बहिपूर्वादि॥ विप्रवर्णाय श्वेतरूपायसहस्रफणामंडलयुक्ताय शेषाय० आग्नेय्यांवैश्यवर्णाय नीलरूपाय
पंचशतफणामंडलभूषितायतक्षकाय० दक्षिणस्यांविप्रवर्णाय कुंकुमाभाय सहस्रफणायमंडलयुक्तायअनंताय० नैर्ऋत्यां
क्षत्रियवर्णायपीतरूपाय सप्तशतफणामंडलयुक्तायवासुकये० प्रतीच्यांक्षत्रियवर्णायपीतरूपाय सप्तशतफणामंडलयुक्ताय
शंखपालाय०वायव्यांवैश्यवर्णायनीलरूपाय पंचाशतफणामंडलभूषितायमहापद्माय० कौबर्य्यांशूद्रवर्णाय कृष्णरूपाय
त्रिंशत्फणामंडलभूषितायकंबलाय० इशान्यांशूद्रवर्णायश्वेतरूपायत्रिशतफणामंडलयुक्तायककोटकाय० ॥७॥ ॥ एवमा
बरणानिसंपूज्य पुनश्चंदनपुष्पधूपदीपनैवेद्यतांबूलछत्रचामरप्रदक्षिणा स्तुतिनमस्कारादिभिःपूजयेत् ॥ ॥ अथस्तुतिः॥
शिवोदाताशिवोभोक्ताशिवःसर्वमिदंजगत् । शिवोजयतिसर्वत्र यःशिवःसोहमेवच । पिंगाय पिंगकेशाय पिंगभूः पिंग
लोचनः । पिंगलामध्यसंस्थाय सुपिनाकधरायच ॥ मृत्युंजयमहादेवत्राहिमांशरणागतं । जन्ममृत्युजरारोगैःपीडितं
कर्मबंधनैः । तावकस्त्वद्गतप्राण स्त्वत् चित्तोहंसदामृड । इतिविज्ञाप्य देवेशंनमस्कुर्याच्त्र्यंबकं। संसारसागरेदेवपतितोहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जगत्पते। दुःखव्याधिजराशोकात् त्राहिमांजगदीश्वरं । मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर । तत्सर्वंक्षम्यतांदेवममत्वं वरदोभव । एवंस्तुत्वानमस्कुर्यात् । नमःशिवायशुद्धायसर्वगायामृतात्मने । कपर्दिनेनमस्तुभ्यंत्रिनेत्रायनमोस्तुते । नमश्चंद्रकलाधारनमोदिग्वसनायच । पिनाकपाणयेतुभ्यंगिरिशायनमोस्तुते । जगत्रक्षांसर्गानांकारणायनमोस्तुते । गौरीकांतनमस्तुभ्यंनमस्तुभ्यंसुधात्मने। विश्वरूपायसौम्यायनमस्तुभ्यंसुखात्मने । ब्रह्मविष्णुस्वरूपायनमस्तेस्तुजगत्पते। चंद्रसूर्यस्वरूपायसर्वदेवमयायच। एवंस्तुत्वानमस्कृत्यचंडंपूजयेत् । चंडायनमःइतिवंदनादिनिर्माल्येनसंपूज्य । भक्षभोज्यान्नपानादितांबूलंस्रग्विलेपनं निर्माल्यभोजनंतुभ्यंदत्तमस्तु शिवाज्ञया इतिमंत्रेणचंडायनैवेद्यांशदत्वा नमस्कुर्यात्॥ ततइंद्रादिदिक्पतिभ्योनमः इतिसंपूज्य इंद्रादिदिक्पतिभ्यइमंबलिंसमर्पयामिइतिबलिंदद्यात्॥ आदित्यादिग्रहेभ्यो नमःइतिसंपूज्य आदित्यादिग्रहेभ्योधिदेवताप्रत्यधिदेवतालोकपालसहितेभ्यइमंबलिंसमर्पयामि ॥ ततःकलशस्थरुद्राणां पूजा ॥ रुद्राय० अघोराय०पशुपतये० विरूपाय० विश्वरूपणे० त्र्यंबकाय० कपर्दिने०शूलपाणये० भैरवाय०ईशानाय० महेशाय० । चंदनपुष्पादिभिःसंपूज्यनमस्कुर्यात् । ततःपूजापरिपूर्णतांप्रार्थयेत् ॥ अद्यपूर्वोच्चरितएवंग्रहगुणविशेषण विशिष्टायांतिथौयथाशक्त्या श्रीमहारुद्रस्यपूजनकृतस्यविधेयन्युनमतिरिक्तं तत्सर्वंश्रीशिवप्रसादात्परिपूर्णमस्तु । उत्तरे कर्मण्यविघ्नमस्तु। इतिपूजाविधिः॥ ॥ ततोमंडपस्तंभदेवानामाचारप्राप्तबलिदानांतापूजाकार्या॥ ॥ अथहोमविधिः॥ तत्रकुंडकरणात्पूर्वंपृथिव्यादीनांपूजाकार्या॥ यथा । पूजासंभारंसंपाद्य देशकालौसंकीर्त्य करिष्यमाणकुंडेतत्रादौपृथिव्यादीनांपूजामहंकरिष्ये । इतिसंकल्प्य कूर्मपृष्ठोपरिस्थितां शुक्लवर्णां चतुर्भुजां पद्मशंखचक्रशूलधरां सुप्रसन्नांध्यात्वापुष्पांजलिरावाहयेत्। आगच्छसर्वकल्याणिवसुधेलोकधारिणि। पृथिवीब्रह्मदत्तासिकाश्यपेनाभिवंदिता । रत्नाकरेविष्णुनात्वं धृतावाराहरूपिणा । आगच्छवरदेधात्रियज्ञेस्मिन्शुभदायिनि । एवमावाह्य स्योनापृथिवीतिपृथिवींचंदनादिभिः संपूज्य प्रार्थयेत् ॥ शेषमूर्ध्निस्थितांरम्यांनानासुखपदायिनीं विश्वधात्रींमहापुण्यांविश्वस्यजननींपरां। यज्ञभागंप्रतीच्छत्त्व खातार्थं प्रणमाम्यहं । तवोपरिकरिष्यामि कुंडंचशुभलक्षणं । क्षंतव्यंचत्वयादेवि सानुकूलामखेभव । मातर्भूमिजगन्माता सर्वा

धाराहरिप्रिया । भूयास्मपुत्रैःपशुभि र्योनोद्वेष्टिसमिद्यतां ॥ निर्विघ्नं ममकर्मेदंयथास्यात्त्वंतथाकुरु । एवंप्रार्थ्यपुष्पांजलिं दत्वादर्भैःखातमेदिनींमार्जयेत् । स्योनापृथिवीतिमंत्रेणभुविजलंसिंचेत् । ततःसिंचंतीतिमंत्रेणदधिदुग्धादिभिःसिंचेत् । सिंचंतीत्यस्यहर्यतःप्रागाथोगायत्रीद्वः सेचनेवि० । अभ्यर्च्यगंधपुष्पाद्यैरर्घंदद्यात्ततोबुधः । पुष्पाक्षतजलादिक मर्घपात्रे कृत्वा हस्ताभ्यामादाय मंत्रेणार्घंदद्यात् । वसुधेपूजितासित्वंविष्णुनाशंकरेणच । पार्वत्याचैवगायत्र्यास्कंदवैश्रवणादिभिः। इंद्राद्यैःपूजितासित्वमघर्मविजिगीषया । सौभाग्यंदेहिपुत्रांश्चधनंधान्यंशुभांमति। गृहाणार्घमिमंदेविकर्मसिद्धिंप्रयच्छमे । अनेनार्घ्यंदत्वापुष्पांजलिरुपचारानर्पयेत् । उपचारानिमांस्तुभ्यंददामिपरमेश्वरि। भक्त्यागृहाणदेवेशित्वामहंशरणंगतः। ततःपायसापूपसक्तादिभिर्बलिर्देयः । सुपात्रेणबलिंगृह्णीयात् । सपरिवारायै भूम्यैबलिंसमर्पयामिनमम ॥ ततःखानित्र पूजा । त्वष्ट्राविनिर्मितः पूर्वंलोकानांहितकाम्यया । पूजितोसिखनित्रत्वंसिद्धिदोभवमेधुना । ततःआधारशक्तयेनमः। कूर्माय० अनंताय० इतिसंपूज्य । ततोवास्तुपुरुषायनम इतिवास्तुंसंपूज्य वास्तुपुरुषायेमंबलिंसमर्पयामि इतिबलिंदत्वा इंद्रादिदिक्पतिनसंपूज्यतेभ्यो बलिंदत्वापुनःपृथिव्यैपुष्पांजलिंदद्यात् । त्वंदेविखननार्थंतुपूजां गृहाणमेमखे । पूजनात् शेषकूर्माभ्यांशुभांवृद्धिंप्रयच्छमे ॥ ततःपूर्वंनकृतंचेदवेष्टकापूजनंकार्यं । पूजितेपरमाचार्यैर्गंधमाल्यैरलंकृते । भवभूति करिदेविगृहेभागविरम्यतां । संपूज्यप्रार्थयेत् ॥ अव्यंगेचाक्षतेपूर्णेशुभेचांगिरसःसुते । इष्टदेत्वंभवक्षेष्टंत्वांप्रतिष्ठापयाम्यहं । एवंसंपूज्यहोमानुसारेणयथोक्तंकुंडंकुर्यात् ॥ ॥ इतिकुंडकरणाङ्गपूजाविधिः ॥ ॥ अथहोमसंख्याहोमद्रव्याणि चाभिधीयंते ॥ ॥ चतुर्न्यूनशतान्यष्टौसहस्रद्वयमेवच ॥ महारुद्रेदशांशः स्यात्सामवेदेउदाहृतः ॥ १७९६ ॥ होम द्रव्याण्याहपराशरः ॥ व्रीहीन्वाथतिलान्वापियवान्वाखमिधोपिवा । आवोराजेतिमंत्रेणजुहुयाद्घृतमीश्रितं । घृतमिति मधुशर्करादीनामुपलक्षणं । अन्येदेवताभेदेनहोमद्रव्यविशेषाविशेषास्तत्तद्धोमप्रकरणेवक्ष्यंते ॥ ॥ अथहोमविधिः॥ तत्रयजमानकुंडात्पश्चिमतोपविश्यआचम्यप्राणानायम्य। गुरुगणपतिशिवान्त्वाप्रमुखश्चेत्वादिपठित्वादेशकालौसंकीर्त्य क्रियमाणेस्मिन्महारुद्राख्येकर्मणि अग्निप्रतिष्ठांतदंगतया मार्जनादिमेखलायोनि देवतास्थापनपूजनादिकरिष्ये इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संकल्प्य अंजलौपुष्पाण्यादाय । कुंडंस्पृष्ट्वाआवाहयेत् । आवाहयामि तत्कुंडंविश्वकर्मविनिर्मितं । शरीरंप्रकृतेर्दिव्यमत्र
धिष्ठानमद्भुतं। इत्यावाह्ययेचकुंडेस्थितादेवाकुंडांगेयाश्चदेवताः। ऋद्धिंयच्छंतुतेसर्वेयज्ञसिद्धिंसुदान्विता । हेकुंडतवनिर्माणं
रचितंविश्वकर्मणा। अस्माकंवांछितांसिद्धिंइष्टसिद्धंददातुमे॥ ॥ इतिकुंडंसंप्रार्थ्यकुंडमध्येविश्वकर्माणंपूजयेत्। विश्वकर्मन्
हविषेतिपठित्वा विश्वकर्मणेनमः इतिचंदनपुष्पादिभिः संपूज्यप्रार्थयेत् । अज्ञानात्ज्ञानतोवापिदोषास्युःश्रयनोद्भवाः ।
नाशयत्वहितान्सर्वान्वीश्वकर्मन्नमोस्तुते । इतिसंप्रार्थ्य । इदंविष्णुरितिमेखलायांश्वेतवर्णालंकृतायां विष्णुमावाह्य
पूजयेत् । विष्णोयज्ञपतेदेवदुष्टदैत्यनिषूदन । विभोयज्ञस्यरक्षार्थंकुंडेस्मिन्सन्निधोभव । इत्यावाह्यइदंविष्णुरितिविष्णु
र्गायत्रीविष्णुःपूजनेवि०। सामपठित्वा । विष्णवेनमः । प्रथमायैविष्णुदैवत्यैसात्विकायै श्वेतवर्णालंकृतायैमेखलायैनमः।
मध्यमेखलायांरक्तवर्णालंकृतायांब्रह्माणमावाह्यपूजयेत् । हंसपृष्ठसमारूढदेवदेवगणावृतः । रक्षार्थंममसत्रस्यकुंडेस्मिन्
सन्निधोभव। ब्रह्मजन्यानमितिरूतुस्त्रिष्टुप्ब्रह्मा पूजनेवि० । सामपठित्वा ब्रह्मणेनमः । द्वितीयायैब्रह्मदैवत्यैराजस्यै
रक्तवर्णालंकृतायैमेखलायैनमः । अधोमेखलायांकृष्णवर्णयुतायांरुद्रमावाह्यपूजयेत् । गंगाधरमहादेववृषारूढमहेश्वर
आगच्छभगवन्रुद्रकुंडेस्मिन्सन्निधोभव । आवोराजेतिवामदेवस्त्रिष्टुप्रुद्रः पूजनेवि० । सामपठित्वा रुद्रायनमः ।
तृतीयायैरुद्रदैवत्यैतामस्यै कृष्णवर्णालंकृतामेखलायैनमः ॥ ॥ अथयोनिपूजा ॥ जगदुत्पत्तिहेतुकायैमनोभवयुतायैयोन्यै
नमः ॥ आप्रागादितिरात्रिरनुष्टुप्रात्रिःपूजनेविनि०। उभेयदिंद्रेतिपूजयेत् । चंदनपुष्पादिभिःसंपूज्यप्रार्थयेत् । सेवंते
महतींयोनिंदेवर्षिसिद्धमानवाः । चतुराःशीतिलक्षाणिपन्नगाद्याः सरीसृपाः । पशवःपक्षिणः सर्वेसंसरंतियतोभुवि ।
विश्वयोनिरितिख्याताजगदुत्पत्तिहेतुका ॥ मनोभवयुतादेविरतिसौख्यप्रदायिनी । मोहयंतीसुरान्सर्वान्जगद्धात्रि
नमोनमः। योनित्वंविश्वरूपासिप्रकृतिर्विश्वधारिणि । कामस्थाकामरूपाचविश्वयोन्यैनमोनमः ॥ ॥ ततोनाभिपूजा ॥
॥ पद्माकाराथवाकुंडसदृशाकृतिबिभ्रतीं ॥ आधारःसर्वकुंडानांनाभिमावाहयाम्यहं । नाभानाभिसितिअसितोगायत्री
सूर्यः। नाभिपूजनेवि० । नाभानाभिमितिसंपूज्यप्रार्थयेत् । नाभेत्वंकुंडमध्येतुसर्वदेवैःप्रतिष्ठिताः। अतस्त्वंपूजितादेवि

शुभदासिद्धिदाभव। ततःकुंडमध्येनिर्ऋतिकोणेवास्तुपुरुषंपूजयेत्। पुष्पाण्यादाय। आवाहयामिदेवेशंवास्तुदेवंमहाबलं।
देवदेवंगणाध्यक्षंपातालतलवासिनं । इत्यावाह्यपूजयेत् । वास्तोष्पतइतिकवषोनुष्टुप्वास्तुः । पूजनेवि०। वास्तोष्पत
इतिसाम्नावास्तोष्पतेप्रतिइतिवसिष्ठःपुरस्ताज्योतिष्मतीजगतीवास्तुः पूजनेवि० ॥ वास्तोष्पतेप्रतिजानि । इतिसंपूज्य
बलिंदद्यात्। वास्तुपुरुषायेमंबलिंसमर्पयामि इतिबलिंदत्वाप्रार्थयेत् । यस्यदेहेस्थिताक्षोणीब्रह्मांडंविश्वमंडलं। व्यापिनं
भीमरूपंचसुरूपंविश्वरूपिणं ॥ पितामहसुतंमुख्यंतुभ्यं वास्तुष्पतेनमः। एवंसंप्रार्थ्यनमस्कुर्यात् ॥ ॥ इतिकुंडपूजा ॥
ततःआचार्यः सुप्रक्षालित पाणिपादआचांतोयजमानादुत्तरतः प्राङ्मुखउपविश्यकुंडेस्मार्त्तान्पंचभूसंस्कारान्यथावत्
कुर्यात् । ततःस्मार्त्तलौकिकंगार्ग्निशरावसंपुटस्थं कुंडस्याग्नेय्यांसंस्थाप्य वागीशांपरमशिवांकस्थांध्यात्वा ताभ्यामुत्पन्न
मग्निंविचिंत्य संपुटमुद्घाट्य अग्नेशिवरेतसत्वमुमायागर्भसंभूतोसि इतिप्रार्थयेत् । ततक्रव्यादमग्निंप्रहिणोमिदूरंयमराज्ञो
गच्छतुरिप्रवाहः । इतिमंत्रेणक्रव्यादांशं नैर्ऋत्यांप्रक्षिप्य देवांशं अग्नेर्मूर्द्धेतिस्वाग्रेसमानयेत् । अग्निमूर्द्धेत्यथिर्गायत्र्यग्निः ॥
आनयनेवि०। अग्निमूर्द्धेतिसाम्नास्वाग्रेसमानीय अनेनैवमंत्रेणाग्निंपूजयेत् ॥ ततइहैवायमितरोजातवेदादेवेभ्योहव्यंवहतु
प्रजानन् । इतितमग्निमभिमंत्र्य अग्निमूर्द्धेतिमंत्रेणाग्निंसंपूज्य शिवरूपमग्निमात्मनोभिमुखंअग्निंदूतेतिस्थापयेत् । अग्निंदूते
तिभरद्वाजोगायत्र्यग्निः । स्थापनेवि० । सामपठित्वा शतमंगलनामानमग्निंप्रतिष्ठापयामि इतिकुंडमध्येस्थापयेत् । ततः
पुष्पांजलिहस्तोयजमानोग्निमावाहयेत् । अग्नआयाहीतिगोतमोगायत्र्यग्निः । आवाहनेवि० । शांडिल्यगोत्रयज्ञस्वरूपाग्ने
अत्रस्वागतोभव । सुप्रसन्नोभव । सुवरदोभव । ततइधनपक्षेपेणसुसमिध्यअग्निंप्रज्वाल्यनमस्कुर्यात् । अग्निंप्रज्वलितं
वंदेजातवेदंहुतांशनं । सुवर्णवर्णममलंसमिद्धंविश्वतोमुखं । इतिमंत्रेणाग्निंप्रणमेत् । ततोग्निंध्यायेत् ॥ ॥ रुद्रतेजसमुद्
भुतंद्विमुर्द्धानंद्विनासिकंषण्नेत्रंचचतुःश्रोत्रं त्रिपादंसप्तहस्तकं । वामभागेचतुर्हस्तंदक्षभागेत्रिहस्तकं । स्रुवंस्रुचंचशक्तिंच
अक्षमालांचदक्षिणे । तोमरंव्यजनंचैवकृष्णवर्णंचवामके । बिभ्रतंसप्तभिर्हस्तैर्द्विमुखंसप्तजिह्वकं । दक्षिणंचचतुर्जिह्वं
त्रिजिह्वमुत्तरंमुखं । शमूकोटिद्वादशाख्यंद्विपंचाशत्कलाहुतं । स्वाहास्वधावषट्कारैरंकितंमेषवाहनं । रक्तमाल्यांबरधरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रक्तपद्मासनस्थितं । रौद्रंत्वांशिवनामानंवह्निमावाहयाम्यहं । त्वंमुखंसर्वदेवानांसप्तार्चिरग्निवल्लभे । आगच्छभगवन्नग्ने
यज्ञेस्मिन्संनिधोभव । एवंध्यात्वाग्निमावाह्य अग्निकृतमित्यग्निंसंपूज्यनमस्कुर्यात् ॥ ॥इत्यग्निस्थापनं ॥ ॥ततोयजमानः
कृताचमनप्राणायामो देशकालौसंकीर्त्यअस्मिन्महारुद्र कर्मणिऋत्विग्भिरेकविंशोत्तरशतरुद्रयात्मककृतस्यजपदशांशेन
श्रीमहारुद्रःप्रीतयेउपकल्पिततिलादि द्रव्येणहोममहंकरिष्ये इतिसंकल्पंकुर्यात् । ततआचार्य । स्तस्मिन्नग्नौपादेश
मितांसमिधंहुत्वा इदंभूमेरितिभूजपकृत्वा इमांस्तोममित्यादिमंत्रैःपरिसमूहनंकृत्वा यथाविधिनादक्षिणतोग्नेर्ब्रह्माण
मुपवेश्यागत्यचरुधर्मेणकुशकंडिकांकृत्वा चरुंश्रपयेत् । तत्ररुद्रायत्वाजुष्टंनिर्वपामीतिनिर्वापः । ग्रहाणांचचरुनिर्वापः ।
प्रकृतिवद्न्यसेत् । अत्रमहारुद्रेजपेचैवव्रतेनक्षत्रपूजने । अंकुशंद्योभवेद्धोमःप्रायश्चित्तेयवीयसीतिवाक्यंकेचित्पठंतितन्नि
र्मूलत्वादुपेक्ष्यंशिष्टाचारविरोधाच्च । ततश्चरुद्वयेपिश्रृताभिघाराद्याज्यभागांतंकृत्वा त्रिनेत्रंसौम्यमित्यादिपूर्वोक्तप्रकारेण
शिवंध्यात्वादेवेशभक्तिसुलभपरिवारसमन्वित यावद्धोमंकरिष्यामितावद्देवइहावह इतिमंत्रेणाग्नावावाह्यवा आवोराजेति
सपरिवारंदेवमभ्यर्च्यअग्निप्रार्थयेत् ॥ अग्नेत्वमैश्वरंतेजःपरमंपावनंहितत् । तस्मात्वदीयहृत्पद्मेश्रीरुद्रंतर्पयाम्यहं । ततो
रुद्रायस्वाहेतिरौद्रचरोर्होमः । इदंरुद्रायनमम । ग्रहाणांचरुहोमस्तत्तन्नाम्नातथातथात्यागः । ततोयजमानोनेकर्त्विग्धृय
मानद्रव्येप्रत्याहुतित्यागकरणासंभवादादावेवदेवतोद्देशेनद्रव्यत्यागंकुर्यात् । इदंचर्वाज्यंतिलयवव्रीह्याद्युपकल्पितं द्रव्यं
श्रीरुद्रप्रीतयेगणपत्याद्यन्यदेवतोद्देशेनमोदकपायसान्नसर्षप गुग्गुलादिद्रव्यंतत्तद्देवताप्रीतयेमयासमर्पितंनमम । ततो
ऋत्विग्भिर्होमः कर्त्तव्यो सचआवोराजेतिसंहितात्मकमंत्रेण । आवोराजेतिवामदेवस्त्रिष्टुप्रुद्रः । होमेवि०। ततःषडंगः।
आवोराजानंहृदयायनमः । अध्वरस्यरुद्रंशिरसेस्वाहा । होतारंशिखायैवषट् । सत्यंयजंरोदस्योः कवचायहुं । अग्नि
पुरातनयिन्नेत्रत्रयायवौषट्। हिरण्यरूपंवसेकृणुध्वंअस्त्रायफट् । ततोनेनमंत्रेणद्विसहस्रसप्तशतषण्नवतिसंख्ययाहोमं
ऋत्विजः कुर्युः । आतूनइतिकुसीदीकाण्वोगायत्रीविनायकः । होमेवि० । अनेनमंत्रेणगणपतिप्रीतयेमोदकैर्होमः ॥
जातवेदसइत्यस्यपस्त्रिष्टुप्जातवेदाअग्निर्देवताहोमेवि० । ॐजातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः । सनः

पर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः । इतिमंत्रेणसर्षपैर्मधुघृताप्लुतैर्होमः । त्र्यंबकमितिवसिष्ठोनुष्टुप्रुद्रः ।
होमेवि०। त्र्यंबकमितिमंत्रेणघृतमधुशर्करात्कंगुग्गुलंजुहुयात्। सप्तशत्याप्रतिश्लोकंपायसान्नेनहोमः । ग्रहाणांचस्वस्वमंत्रै
राज्याहुतिंसमित्तिलादिद्रव्यैर्होमः । द्राक्षादिद्रव्यैर्यथालाभमन्यद्रव्यैर्होमः । तत्रकदलीफलंनिस्त्वचंहोतव्यंमितिशारदा
टीकायांपदार्थादर्शकाराआहुः । सामवेदीयरुद्रपद्धतिकारोप्याह रंभाफलंतुहोतव्यंनिस्त्वचंकर्मसिद्धये सत्वचंजुहुयाच्च
स्तुनसकर्मफलंलभेत्। इति । ततःपीठस्थदेवतानांमेकैकाज्याहुतिंतिलैर्वाजुहुयात्। यथा । ॐनमोभगवतेरुद्रायस्वाहा।
सद्योजातायस्वाहा वामदेवाय० अघोराय० तत्पुरुषाय० ईशानाय० नंदिने० महाकालाय० गणेश्वराय० वृषभाय०
भृंगिरीटये० स्कंदाय० उमायै० चंडीश्वराय० अनंताय० सूक्ष्माय० शिवाय०एकपदे० एकरुद्राय० त्रिमूर्तये०श्रीकंठाय०
वामदेवाय० ज्येष्ठाय० श्रेष्ठाय०रुद्राय० कालाय० कलविकरणाय० बलाय० बलविकरणाय०बलप्रमथनाय०।अणिम्ने०
महिम्ने० लघिम्ने० गरिम्ने०प्राप्त्यै०प्राकाम्यै० ईशितायै० वशितायै० ब्राह्म्यै० माहेश्वर्यै०कौमार्यै० वैष्णव्यै०वाराह्यै०
ऐंद्र्यै० चामुंडायै० चंडिकायै० असितांगभैरवाय० रुरुभैरवाय० चंडभैरवाय०क्रोधभैरवाय० उन्मत्तभैरवाय० कपाली
भैरवाय० भीषणभैरवाय० संहारभैरवाय० भवाय० शर्वाय० ईशानाय०पशुपतये० रुद्राय० उग्राय० भीमाय० महते०
अनंताय०वासुकये०तक्षकाय० कुलीराय०कर्कोटकाय०शंखपालाय कंबलाय०अश्वतराय० धनंजयाय० पृथवे०हैहयाय०
अर्जुनाय०शाकुंतलेयाय० भरताय०नलाय०रामाय०हिमवते०निषधाय०विंध्याय०माल्यवते०पारियात्राय०मलयाय०
हेमकूटाय० गंधमादनाय० इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० कुबेराय० ईशानाय० शच्यै०
स्वाहायै० वाराह्यै० खड्गीन्यै० वारुण्यै० वायव्यै कौबेर्यै० ईशान्यै० वज्राय० शक्त्यै० दंडाय० खड्गाय० पाशाय०
अंकुशाय० गदायै० त्रिशूलाय० ऐरावताय० मेषाय० महिषाय० प्रेताय० मकराय० हरिणाय० नराय० वृषभाय
ऐरावताय० पुंडरीकाय० वामनाय० कुमुदाय० अंजनाय० पुष्पदंताय० सार्वभौमाय० सुप्रतीकाय० इंद्राय० अग्नये०
विरूपाक्षाय० यमाय० निर्ऋतये० विश्वरूपाय० वरुणाय० वायवे० पशुपतये०कुबेराय० ईशानाय० ऊर्ध्वलिंगाय०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शेषाय० तक्षकाय० अनंताय० वासुकये० शंखपालाय० महापद्माय० कंबलाय० कर्कोटकाय० ॥ ॥ बलोलक्ष्मीप्रीतये
श्रीरसिमयिरमस्वेतिमंत्रेण श्रीसूक्तेन वाहोमः। एवंहोमंपरिसमाप्य चंदनाद्युपचारैरग्निंदूतेतिमंत्रेणाग्निंसंपूज्य तत्रैवआवो
राजेति श्रीरुद्रंसंपूज्य पीठसंन्निधौगत्वा कुंडमध्यात् श्रीरुद्रंपीठेसमागतंविभाव्य तत्रनानोपचारैर्पूजयेत् । आचम्य
प्राणानायम्यदेशकालौसंकीर्त्य कृतस्यहोमसांगतासिद्धये श्रीमहारुद्रस्यपूजनमहंकरिष्ये इतिसंकल्प्य आवोराजेति
मंत्रेणसंपूज्य चंडायनमः इतिचंडायनैवेद्यांशंदत्वा यथाविधिनाग्रहांच संपूज्यनमस्कृत्य । पुनर्देवंकुंडेसमागतंविचिंतयेत् ।
ततोव्याहृतीचतुष्टयंहुत्वा तत्रेण चरुद्वयस्यस्विष्टकृद्धुत्वा पुनःव्याहृतित्रयंहुत्वा समिधंहुत्वादेवसवितरितिअनुपर्युक्षणंकृत्वा
अन्वमंस्था इतिप्रसिच्य यज्ञवास्तुकृत्वा वस्वाहुतिंजुहुयात् । ततोदिक्पतिभ्योबलिन्दद्यात् । यथा ॥ ॥ प्राच्यां
त्रातारमिंद्रमिति इंद्रंचंदनादिभिःसंपूज्य सदीपंबलिमुपनीयइंद्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमंसदीपं
बलिंसमर्पयामि ॥ इतिजलमुत्सृजेत् । भोइंद्रदिशंरक्षबलिभक्षसकुटुंबस्यास्य यजमानस्य आयुःकर्त्ताक्षेमकर्त्ता शांति
कर्त्तापुष्टिकर्त्ताशुभकर्त्ताभव । एवंसर्वत्रपुष्पाक्षतजलानि पूर्वाभिमुखस्त्यक्त्वाददेत् । एवंआग्नेय्यांअग्निस्तिग्मेनेति
अग्निंसंपूज्य अग्नयेसांगायेत्यादि । भोअग्ने० । दक्षिणस्यांनाकेसुपर्णमिति मंत्रेणयमायनमः इतियमंसंपूज्य यमाय
सांगाय० भोयम० । नैर्ऋत्यांवेत्थाहीतिनिर्ऋतिंसंपूज्य निर्ऋतयेसांगाय० । भोवरुण । वायौवातआवात्विति
वायुंसंपूज्य वायवेसांगाय० भोवायो० । ऊत्तरस्यांतवाहंसोमितिकुबेरंसंपूज्य कुबेरायसांगाय० भोकुबेर० । ऐशान्यां
अभित्वाशूरेति इशानंसंपूज्य ईशानाय०सांगाय० भोईशान० । निर्ऋतिवरुणयोर्मध्ये अतोदेवाइतिअनंतंसंपूज्य
अनंतायसांगाय० भोअनंत० । इंद्रेशानयोर्मध्येमयिवर्चइतिब्रह्माणंसंपूज्य ब्रह्मणेसांगाय० भोब्रह्मन्०। ततःकुंडादुत्तर
स्यांआदित्यादिग्रहान् नामभिंत्रैःसंपूज्य । बलिमुपनीयआदित्यादिग्रहेभ्योधिदेवता प्रत्यधिदेवतालोकपालसहितेभ्यः
इमंमाषभक्तबलिंसदीपंसमर्पयामि । भोभोआदित्यादिग्रहाः ममास्ययजमानस्य आयुःकर्त्तारः क्षेमकर्त्तारः शांति
कर्त्तारः पुष्टिकर्त्तारशुभकर्त्तारोभवत । आतूमइतिगणपतिंसंपूज्य गणपतयेसांगायसपरिवाराय ऋद्धिसिद्धिसहितायेमं

बलिंसमर्पयामि । आप्रागादितिदुर्गांसंपूज्य दुर्गायैसांगायैसपरिवारायै इमंबलिंसमर्पयामि । वास्तोष्पतेतिवास्तुंसंपूज्य
वास्तुपुरूषायसांगाय० । रुद्रपीठस्याग्रेआवोराजेतिरुद्रंसंपूज्य रुद्रायोमासहितायसांगायेत्यादि । ततःक्षेत्रपालायमहा
बलिंकुंकुमादिरक्तंरक्तपुष्पोपेतंसदीपंदद्यात्। क्षेत्रपालायनमःइतिक्षेत्रपालंसंपूज्यक्षेत्रपालायसपरिवारायेमंबलिंसमर्पयामि।
भोभोक्षेत्रपालेत्यादि० । ततस्तंबलिंशूद्रेणचतुष्पथेप्रेषयेत् । ततःप्रक्षालितपाणिपादआचम्य देशकालौस्मृत्वाकृतस्य
महारुद्रसांगतासिध्यर्थं पूर्णाहुतिहोममहंकरिष्ये इतिसंकल्प्य । पवित्रेस्थो वैष्णव्यौइतिमंत्रेण औषध्यापवित्रेछित्वा
विष्णोर्मनसापूतेस्थइतिप्रक्षाल्य आज्यस्थाल्यांपवित्रे उदगग्रेसन्यस्यतस्यांपवित्रां तर्हितायामाज्यंप्रक्षिप्य देवस्यत्वेती
उत्पूयपवित्रेणौक्षित्वा आज्यमग्नावधिश्रित्य उदमुद्वास्य चतुर्गृहीतं द्वादशगृहीतंवाश्रुचिंगृहीत्वा तदुपरिवस्त्रयुतनालिकेर
फलपुष्पादिनिधाययजमानान्वारब्धआचार्योजुहुयात् । तत्रमंत्रः ॥ मूर्द्धानमितिरूक्त्रयस्यभरद्वाजस्त्रिष्टुबग्निः । पूर्णा
हुतौविनियोगः । मूर्द्धानमितिरूक्त्रयंपठित्वा पूर्णाहुतिंजुहुयात् । इदमग्नयेवैश्वानरायनमम । ततोवसोर्द्धारा । तत्रायं
प्रकारः। वह्नेरुपरि स्तंभद्वयविधृतामौदुंबरीं रूज्वीमकोटरांबाहुप्रमाणामार्द्रस्रुचं पूर्वाग्रांनिधायतदुपरिशिक्यादिविधृतेन
निर्मलघृतपूरितेनताम्रादिकुंभेनाधो यवमात्रछिद्रेणाज्यमुंचन्सततमग्नेरूपरिवसोर्द्धारांपातयेत् । तस्यांपतंत्यां रौद्रमाग्ने
यादीनिसूक्तानिश्रावयेत्। श्रावयेत्सूक्तमाग्नेयंवैष्णवंरौद्रमैंदवं। महावैश्वानरंसामज्येष्ठसामंचपाठयेत्॥ तत्रसामवेदेआग्नेयं
सूक्तंकस्तेजामिरित्याध्यायः। वैष्णवेविष्णुसंहितारौद्रंरौद्रध्यायः। एंदवंउच्चाबेजाइत्यादि ऋक्त्रयं । महावैश्वानरंसाम ।
ज्येष्ठसामआज्यदोहं । एवंवसोर्धारांकृत्वारुद्रप्रार्थनांकुर्यात् ॥ ॥ नमःसोमायशांतायसगुणायादिहेतवे । निवेदयामि
चात्मानं त्वंगतिःपरमेश्वरः ॥ नमामित्वंविरूपाक्ष नीलग्रीवनमोस्तुते ॥ त्रिनेत्रायनमस्तुभ्यं मुमादेहार्द्धधारिणे । त्रिशूल
धारिणेतुभ्यं भूतानांपतयेनमः। पिनाकिने नमस्तुभ्यं नमोमीदुष्टमायच । नमामित्वांमहाभूतपतये त्वांनमाम्यहं। स्वयं
भिक्षांनभोक्ताचभक्तानांराज्यदायक ॥ राजसेनस्वयंब्रह्मा सात्विकेनस्वयंहरिः। तामसेनस्वयंरुद्र स्त्रिलयंत्वयिसंस्थितं।
त्वंमातात्वंपिता हित्वं त्वंबधुस्त्वंचमेसखा । त्वंविद्याद्रविणत्वंच त्वंचसर्वंममप्रभो ॥ नमोवीरंचिविष्णवीशभेदेनपरमा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मने । स्वर्गस्थितिसंहारव्यापिनेपरमात्मने । दूर्वारूपंसमासाद्यदेहिनांदेहदायतुयतीनांमुक्तिदस्त्वंचमुक्तिभुक्तिप्रदायतु ।
कर्मन्यूनातिरिक्तंयत्सपहोमार्चनंमया । कृतमज्ञानतोदेवतन्ममक्षंतुमर्हसि। अज्ञानादल्पशक्तित्वादालस्यात्दुष्टचेतसा ।
यत्न्यूनमतिरिक्तंवातत्सर्वंक्षंतुमर्हसि॥ एवंस्तुत्वानमस्कृत्यदेवान्विसर्जयेत् । सुतासोमेतित्वाष्टयनुष्टुप्सोमः। सेतुःसाम्नाः
प्रजापतिस्त्रिष्टुवात्माविसर्जनेविनियोगः। सामद्वयंपठित्वा गच्छगच्छमहादेवस्वस्थानंपरमेश्वर। यत्रब्रह्मादयोदेवनविदुः
परमंपदं । तिष्ठतिष्ठपरेस्थानेस्वस्थानंपरमेश्वर। यत्रब्रह्मादयःसर्वेसुराविष्ठंतिमेहृदि। इतिदेवंस्वहृदिविसृज्य अग्निंविस-
र्जयेत्। गच्छत्वंभगवन्नग्नेस्वस्थानंकुंडमध्यतः। हव्यवाहायदेवेभ्यःशीघ्रंगच्छप्रसिदमे। गच्छगच्छसुरश्रेष्ठस्वस्थानंपरमेश्वर
यत्रब्रह्मादयोदेवास्तत्रगच्छहुताशनः। चतुर्भिश्च०। ततःप्रदक्षिणागमनं।पात्रनिनयनं। पुनःपूरणं। समाचाराःसुसंप्रोक्षित
मित्यादिकृत्वा होमसंकल्पः ॥ अस्मिन्यज्ञे । यऋत्विभिःकृतोहोमःपृथक्पृथक् । यस्ययस्यचदेवस्ययद्द्रव्यंयथाहुतं ।
यावद्यावच्चसंख्याकंमंत्रेणयेनयेनवः । सदेवःसपरिवारःप्रीयतांवरदोस्तुमे । सुप्रीतःशांतिदःश्रेयपुष्टिश्चभवत्विति ॥
अनेनोक्तविधानेनग्रहयज्ञान्वितेनच । समिदाज्यादिहव्येनस्वस्वमंत्रहुतेनच । रुद्रजपदशांशेनकृतोहोममयानघः ।
तेनश्रीभगवान्रुद्रःप्रीयतांसकुटुंबकः ॥ ततोब्राह्मणभोजनसंकल्पः ॥ कृतस्यास्यमहारुद्रःकर्मणः सांगतासिध्यर्थंयथा
संपन्नेमाष्यादिनाइयत्संख्याकान्ब्राह्मणान्भोजनेनाहंतर्पयिष्ये ॥ ततोआचार्यादिभ्योदक्षिणांदद्यात् । कृतस्येत्याद्यु
च्चार्यब्रह्मणेपूर्णपात्रंसहिरण्यं अमुकगोत्रेत्याद्यभिधायतुभ्यमहंसंप्रददेनमम । एवंसर्वत्र । दक्षिणामाहबृहत्पराशरः ।
अनड्वाहंचवस्त्रंचदद्याधेनुंचदक्षिणामिति । रुद्रादिचतुर्षुरुद्रेषुसामान्यतइयंदक्षिणा । महारुद्रेतुशातातपोविशेषदक्षिणा
माहमहारुद्रजपंचैवकारयेच्चयथाविधि। जुहुयाच्चदशांशेनदूर्वामाज्यपरिप्लुतां। एकादशस्वर्णनिष्काःप्रदातव्याश्चदक्षिणा
एकादशपशूंश्चैवदेयाद्वित्तानुसारतइति। परशुरामोत्रगौः। रुद्राणांतयामतत्वमशीयेतिश्रुतेः। रुद्रीजापकेभ्यःइयंदक्षिणा।
वत्रसवत्सधेन्वनडुहौप्रत्येकंदक्षिणा । अथवानिष्कमितंसुवर्णप्रत्येकं ॥ अथवागौरेकैका । अत्रसमविभागःसमंस्यादश्रुत
त्वादिहिन्यायन । आचार्यायद्विगुणा । कृतस्येत्याद्युच्चार्यइमांदक्षिणांरुद्रीजापकतुभ्यमहंसंप्रददेनमम । अन्येभ्योपियथा

शक्तिद्विजेभ्योदक्षिणांददेतिवाक्यादन्येभ्योदक्षिणांशक्त्यादद्यात् । ग्रहजापकेभ्यग्रहोक्तादक्षिणाभूयसींच ॥ ॥ इति
दक्षिणादानं ॥ ॥ सचग्रहकलशोदकेनरुद्रकलशोदकेनद्वारकलशोदकेनच दूर्वादिपल्लवैर्यथोक्तमंत्रैः वैदिकैःपौराणीकै
श्चाभिषेकः। अभिषेकेवामभागेपत्नी । अभिषेकानंतरंयजमानःसर्वौषधीभिरालिप्तः शुद्धोदकेनस्नायात् । ततःशुद्धांबर
धरःसपत्नीकोयजमानोरुद्रपीठेश्रीरुद्रंसंपूज्य ग्रहांश्चसंपूज्यपुष्पांजलिंदत्वास्तुवीत। विश्वेश्वरविरूपाक्षविश्वरूपसदाशिव।
शरणंभवभूतेशकरुणाकरशंकर । जपहोमार्चनेदेवयत्कृतंतुमयाद्यवै । तेनसर्वेणसर्वेषसदामेवरदोभव । माहारुद्रजपो
यज्ञोन्यूनोवाप्यधिकोपिवा । संपूर्णस्त्वत्प्रसादेनभूयाद्भूतिविभूषण । मंत्रहिनंक्रियाहीनंभक्तिहीनंसुरेश्वर । तत्सर्वं
क्षम्यतांदेवममत्वंवरदोभव । आवाहनंनजानामिनजानामिविसर्जनं । पूजांचैवनजानामित्वंगतिःपरमेश्वर । एवंस्तुत्वा
प्रणम्यसुतसोपेतिविसर्जयेत् ॥ गच्छगच्छमहादेवस्वस्थानंपरमेश्वर । यत्रब्रह्मादयोदेवानविदुःपरमंपदं । यांतुरुद्रगणा
सर्वेपूजामादायकृत्स्नशः । ऋद्धिंचविपुलांदत्वापुनरागमनायच । उत्तिष्ठन्नितिग्रहान्विसृज्ययांतुदेवगणा इतिमंडप
देवानांविसर्जनं । ततोध्वजापताकाद्युपस्करयुतमंडपमाचार्यायतुभ्यमहंसंप्रददेनमम । तेनश्रीमहारुद्रःप्रीयतां ॥ ततो
यज्ञपात्राणियथोपकरणानिआचार्यायदद्यात् । एतेषांदानेसंकल्पवाक्यंप्रजापतिप्रियतां । ततःएकादशःकुंभानांरुद्राणां
रुद्रीजापकेभ्योदानं । श्रीरुद्रप्रतिमांस्वर्णमयींवस्त्रयुगान्वितां । श्रीरुद्रप्रीतयेचापिमाप्तानिष्टनिवृत्तये । प्रार्थितांभीष्ट
संसिध्यैतुभ्यंश्रीरुद्ररूपिणे । संप्रदद्यात्विदानेनयथोक्तफलमश्नुते। ततोसद्दस्यंपूजयित्वादक्षिणांदद्यात् । अद्यपूर्वोच्चरित
एवं०तिथौमहारुद्रःकर्मणःकृतस्यविघ्नेर्यन्यूनमतिरिक्तंतत्सर्वंश्रीमतांप्रसादात्परिपूर्णमस्तु ॥ ततःस्तिलकं । आशिषश्च ।
ततोदीनांधःकृषणेभ्योयथाशक्तिदत्वा आत्मानंकृतार्थमन्वीत॥ ॥ छंदोगानांहितार्थायपद्धतिर्यामयाकृता। भवानीशंकरौ
तेनप्रीयेतांममसर्वदा । यदत्रसाधुतत्साधुयदसाधुतदादितः विलोक्यविबुधैः शोध्यमयैषविहितांजलिः ॥ ॥इतिविद्वन्
मुकुटमाणिक्यनिराजितचरणकमलशुक्ल श्रीविश्रामात्मजशिवरामकृत महारुद्रःपद्धतिसमाप्ताः ॥ ॥अथातिरुद्रेविशेषः॥
सचएकादशमहारुद्रभवति ॥ एकत्रिंशोत्तरत्रयोदशशतरुद्रीभिरतिरुद्रः ॥ संकल्पादिसर्वत्रअतिरुद्रोद्देशेनसर्वंभवति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यासपूजादिकंसर्वंपूर्ववद्भवति। एकविंशत्युत्तरशतसंख्याकारुद्रीजापकाभवंति ॥ लक्षत्रितयसप्तसहस्रचतुःशतमेकषष्टि संख्याकामंत्राः । अयुतत्रितयसप्तशतषट्चत्वारिंशत्संख्ययादशांशेनहोमः ॥ महारुद्रापेक्षयाएकादशगुणादक्षिणा । एवंब्राह्मणभोजनादिसर्वमन्यपूर्ववत् ॥ ॥ इतिविद्वन्मुकुटमाणिक्यनिराजितचरणकमलशुक्लश्रीविश्रामात्मजशिवराम वीरचितेरुद्रचिंतामणौएकरुद्रादिरुद्राणांप्रयोगः ॥ समाप्तः ॥

श्री अंबिका प्रीं. प्रेसमां मुनशी हरमणिशङ्कर धनशङ्करे छाप्युं. गांधीरोड– अहमदाबाद,

અર્પણ.

શ્રી ઉત્કંઠેશ્વર મહાદેવ (ઉંટડીયા મહાદેવ)

જાબાલી આશ્રમ; વેત્રવતિ તીરે (વાત્રકના કાંઠે)

મુ. ઉંટડીયા. તા. આતરસુંબા

વાયાઃ દેહગામ તથા કપડવંજ.

આપના પ્રસીદ્ધ ધામમાં મહાશીવરાત્રી ઉપર સંવત ૧૯૮૨ ની સાલથી એટલે ૧૮ વરસોથી નિયમીત આવવાનો મને લાભ પ્રાપ્ત થયો છે. એટલુંજ નહી પણ મહાશીવરાત્રીની પવિત્ર રાતના ચારે પ્રહરમાં સામવેદની મહારૂદ્ર પદ્ધતી મુજબ ભસ્મ રૂદ્રાક્ષ ધારણ કરી એકાદશ ન્યાસ તથા લઘુરૂદ્ર સાથેની મહાપૂજા, પંચવક્ત્ર પૂજન સાથે કરવાનો મહાલાભ આપ આપી રહ્યા છો અને તેથી સામવેદથી થતા ભવ્ય પૂજનનો મને આપે મહાસ્વાદ ચખાડયો છે.

આ પૂજન પોતાના પૂર્ણ ભાવથી ત્યાંના આચાર્ય સ્વ. કેશવલાલભાઇ કરતા કરાવતા હતા, અને હાલ તેમના પુત્ર પ્રેમશંકર કરાવે છે. તેમાં મને રસ લાગવાથી મને પણ મારી સ્વશાખાના કર્મનું ભાન આપે કરાવ્યું છે, એટલુંજ નહીં પણ તે પૂજન હાલ આઠેક વરસથી મારા ખર્ચે લઇ આપે મને કૃતાર્થ કરેલો છે.

સામવેદના કર્મકાંડ કરાવનારા, બીજા વેદના યાજ્ઞીકોની સરખામણીમાં ઘણા ઓછા છે, અને નવા શીખનારને સામવેદનું સાહિત્ય સુગમ રીતે મળી શકતું નથી ને તેથી વીદ્યાનો લોપ થાય છે આથી આ મહારૂદ્ર પદ્ધતીનુ પુસ્તક યોગ્ય અધીકારીને આપવા માટે મેં આપની કૃપાથી પ્રસિદ્ધ કર્યું છે તે સ્વીકારશોજી.

લી.

તા. ૧–૫–૧૯૪૪

મુનશી હરમણીશંકર ધનશંકરના પ્રણામ.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति श्रीसामवेदमहारुद्रपद्धति समाप्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=03.08.19 12:03
,TRANSFERRED=2019/08/03 at 12:11:56
,PAGES=24
,TYPE=STD
,NAME=S0001270
,Book Name=M-52-SAMVED MAHARUP PADANTI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection